सांख्यचंद्रिका पत्र २६

ए। श्रीरामायनमः॥श्रीगणेशायनमः॥श्रीगुरुभ्योनमः॥श्रीरामगोविंदसुतीर्थपादकृपाविशेषादुपलब्धबोधः।श्रीवासुदे
वादधिगम्यसर्वशास्त्राणिवक्तुंकिमपिस्पृहानः १ प्रकृतिंपुरुषंचैवनत्वाचार्यान्गुरूंस्तथा॥नारायणःसांख्यमूले
१ तनुतेसांख्यचंद्रिकां २ तदिदंशास्त्रंचतुर्व्यूहं हेयंसाधनंहानंहानसाधनंचेतिमुमुक्षुजिज्ञासितत्वात् तत्रहेयंसर्वप्रति
कूलवेदनीयतयादुःखंहेयहेतुः प्रकृतिपुरुषयोरविवेकः हानंदुःखस्यात्यंतनिवृत्तिः परमपुमर्थःहानहेतुःप्रकृ
तिपुरुषविवेकस्तद्द्वाराशास्त्रं अतोऽत्रपरमपुमर्थस्यस्वतएवेष्टत्वेनतदुपायेशास्त्रेप्रवृत्तावतामिष्टसाधनताज्ञानादवश्यंजि
ज्ञासाभवतीत्याह॥दुःखत्रयेत्यादि दुःखत्रयंआध्यात्मिकंआधिभौतिकंआधिदैविकंचतत्रात्मानंशरीरमंतःकरणंवा
धिकृत्ययज्जायतेतदाध्यात्मिकंदुःखंवातपित्तादिप्रकोपजन्यंकामादिजन्यंच तत्रभूतानिप्राणिनोऽधिकृत्ययज्जायतेत
दाधिभौतिकंव्याघ्रचोराद्युत्थंएवंदेवानग्न्यादीनधिकृत्ययज्जायतेतदाधिदैविकंदाहशीतादिकृतंयक्षराक्षसविनायक

दुःखत्रयाभिघाताज्जिज्ञासातदपघातकेहेतौ दृष्टेसाऽपार्थाचेन्नैकांतात्यंततोऽभावात् १

ग्रहाद्यावेशनिबंधनंच यद्यपिसर्वमेवदुःखंमानसमेव तथापिमनोमात्रजन्यत्वाजन्यत्वाभ्यांमानसत्वामानसत्ववि
भागः तस्यदुःखत्रयस्याभिघातात् असह्यसंबंधात् तदपघातकेप्रकृतिपुरुषविवेकद्वारादुःखोच्छेदकेहेतौवक्ष्यमाण
शास्त्रेप्रवृत्तावतांजिज्ञासाभवत्येवेत्यर्थः यद्यपिवर्त्तमानंस्थूलंदुःखंद्वितीयक्षणेस्वयमेवनश्यति अतीतंतुनष्टमेव
तथाप्यनागतस्यदुःखनिवृत्तौतात्पर्यं अत्रयद्यपिसत्कार्यवादेनध्वंसप्रागभावरूपाभावस्तथापिनिवृत्तिरत्रसूक्ष्मरूपस्या
तीतावस्थात्वमेवस्थूलस्वरूपाप्राप्तियोग्यत्वंवानचानागतिमानाभावः यावच्चित्तकालावस्थापिकार्यजननशक्त्यायावच्चित्तस
त्वमनागतदुःखानुमानात् ननुतत्रशरीरदुःखस्यरसायनादिसेवनात् मानसस्यमनोज्ञस्त्रीपानभोजनादितआधिभौतिकस्य
नीतिशास्त्राभ्यासानिरत्ययस्थानाध्यासनादितःआधिदैविकस्यमणिमंत्रौषधादितोदृष्टोपायादेवोच्छेदोभविष्यतीत्याशयेनाशं १

वाद्देषधर्माधर्माद्यनुत्पादात्पूर्वोत्पन्नकर्मणां चाविद्यारागादिसहकार्युच्छेदरूपदाहेन विपाकानारंभकत्वात् प्रारब्धसमाप्त्यनंतरं पुनर्जन्माभावेन त्रिविधदुःखात्यंतनिवृत्तिरूपो मोक्षो भवतीति तादृशसाक्षात्कारहेतौ मननाख्यविचाररूपे शास्त्रे प्रवृत्तावंतो जिज्ञासा भवत्येवेति २ व्यक्ताव्यक्तज्ञानां स्वरूपं दर्शयितुं लक्षणमाह मूलप्रकृतिरिति मूलप्रकृतिः सर्वजनिका प्रकृतिरविकृतिरजन्या तथा चाज न्यत्वे सति जनकत्वं प्रकृतित्वं अव्यक्तमुक्त्वाव्यक्तं द्विविधमाह। महदाद्याः महत्तत्त्वाहंकारपंचतन्मात्राणि प्रकृतिविकृतयः तत्त्वविभाजकोपाध्यवच्छिन्नजनकत्वे सति जन्याः इत्यर्थः षोडशकइति। एकादशेन्द्रियाणि पंच वा काशादीनि महाभूतानि च विकारइति तत्त्वविभाजकोपाध्यवच्छिन्नाजनकत्वे सति जन्या इत्यर्थः पुरुषस्तु सर्वभोक्ता न प्रकृतिर्न विकृतिः अजनकत्वे सत्यजन्य इत्यर्थः आद्यविशेषणेन प्रकृतेर्निरासः द्वितीयेनां द्रियसामान्यादिनिरासः तदेवं पंचविंशतितत्त्वान्युक्तानि सेश्वरसांख्यनयेन पुरुषपदेनैवेश्व

प्र

१ मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ३ दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् त्रिविधप्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ४॥

रस्यापि ग्रहणं मायापदेन चे च्छरसंकल्प एवोच्यते जीवात् स्पष्टं चाविद्याशब्देन च जीवस्य भ्रमरूपो वोच्यते नान्यत् अतो न तदकथनकृतान्यूनतेति संक्षेपः ३ तत्त्वान्युक्तानि तेषां सिद्धिः प्रमाणेन भवति न चैकप्रमाणेन सर्वेषां तत्त्वानां सिद्धिः संभवति तथा च प्रमाणानां कत्वमुचितं तत्र का नि प्रमाणानि कियंति वेत्यत आह दृष्टमिति दृष्टं प्रत्यक्षं अनुमानं अनुमितिकरणं लिंगपरामर्शः आप्तवचनं शब्दप्रमाणं उक्तं कपिलेन भगवतेत्यर्थः कुतः सर्वप्रमाणसिद्धत्वात् सर्वैः प्रमाणैः प्रमातृभिः पतंजलिप्रभृतिभिः सिद्धत्वात् प्रत्यक्षानुमानागमाः प्रमाणानीति स्वीकृतत्वात् उपमानादिकं तु न सर्वप्रमाणसिद्धमिति भावः यद्यपि वैशेषिकैः शब्दो नाभ्युपेयते तथापि तेन प्रमाणांतरमिति भावः एवमन्येपि प्रत्यक्षाद्यपलपंतो न प्रमाणांतरमिति वोध्यं उपमानस्यांतर्भावो यथा गवयपदं गवयवाचकं असति वृत्त्यंतरे तत्र प्रयुज्यमानत्वादिति एवमर्थापत्तेरपि यथा पीनो देवदत्तो दिवा न भुंक्ते इत्यत्र अयं रात्रिभोजी दिवा अभुंजानत्वे सति पीनत्वादिति अत्रापि [illegible] शब्द एव चेष्टात्व नुमानस्यै

कते॥ दृष्टेसेति दृष्टे प्रसिद्धौषधादिविषये स्वसाजिज्ञासा अपार्था अन्यथासिद्धास्त्विति चेदित्यर्थः निषेधयति नेति एकां
तत्वं दुःखोच्छेदस्यावश्यकत्वं अत्यंतत्वं दुःखस्य पुनरनुत्पादस्तदुभयस्य दृष्टोपायादभावात् १ ननु स्वर्गस्य दुःखासंभिन्नत्वादग्नि
ष्टोमाद्युतद्धेतुज्योतिष्टोमादिक एव जिज्ञासा भविष्यतीति तत्राह दृष्टवदिति गुरुमुखादनुश्रूयत इत्यनुश्रवो वेदः कर्मकांडरूप
स्तेन प्राप्तो ज्योतिष्टोमादिरानुश्रविकः उपायो दृष्टवत् औषधादिवत् अत्र हेतुमाह स हीति हि यतः अविशुद्धिः अंगवैगुण्येन हिंस्या
दिति शास्त्रनिषिद्धहिंसा च अंततो वृक्षपत्रादिच्छेदनांशानिध्यात्सूक्ष्मजंतुनाशादेश्च संभवात् अतो दुःखहेतुरेव क्षयेति तत्कर्मणः क्षयि
त्वेन नात्यंतदुःखोच्छेदकत्वं क्षयानंतरं दुःखोत्पत्तेरित्यर्थः अतिशयेति तत्राप्यधिकसुखिदर्शनात् ईर्ष्यामर्षाभ्यां स्वीयो दुःखोत्कर्ष
एवातिशय इत्यर्थः ननु विधिसंस्पृष्टस्य निषेधविषयतापाविरुद्धत्वात् अन्यथा विधिनिषेधाधीनप्रवृत्तिनिवृत्तिसमावेशदोषप्र
प संगादाहवनीयो विधिः पशुहोममिव न हिंस्यादित्यादिनिषेधोऽग्नीषोमीयं पशुमालभेतेत्यादिविधिविषययागीयहिंसापरिहृत्य प्रव

दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः ॥ तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् २

र्तत इति यागीयातिरिक्तहिंसैव पापं न यागीयेति चेत् न हिंसायां विध्यधीनेष्टसाधनत्वस्य निषेधाधीनानिष्टसाधनत्वस्य च
समावेशसंभवात् पशुवधप्रयुक्तस्य प्रत्यानिष्टस्य वित्तव्ययायासादिसाध्यदुःखस्येवाभ्युपगमेन क्रतुसाध्यमहाफलार्थितया
न प्रवृत्तेरुपपन्नत्वेन विधिनिषेधाधीनप्रवृत्तिनिवृत्तिसमावेशदोषाणामनवकाशात् पापमेव हि सिद्धांतपक्षे वा याज्ञीयापि हिंसेति
तदुक्तं ज्योतिष्टोमादिकमविशुद्धमेव अत एवोक्तं भारते पितापुत्रसंवादे तात नैतद्वरुणाभ्यस्तं जन्मजन्मांतरेष्वपि त्रयीधर्ममध
र्मास्यं न सम्यक् प्रतिभाति मे इति अधिकमस्मत्कृतयोगसूत्रव्याख्यानेऽनुसंधेयं तद्विपरीतः श्रेयान् दृष्टानुश्रविकाद्भिन्न उपायः शा
स्त्रैकगम्यात्मसाक्षात्कारः श्रेयान् एकांतात्यंतिकदुःखोच्छेदक्षमः स कस्माद्भवतीत्यत आह व्यक्तेत्यादि व्यक्तं महदादि अव्यक्तं प्रधानं ज्ञः पु
रुषः एषां विविच्य ज्ञानाद्भवतीत्यर्थः [illegible] विलाभिमाननिवृत्त्या तत्कार्य

सा०चं० त्रसर्वत्र पौरुषो बोधः फलं येन जानामीत्यादि व्यवहरति जन इत्यास्तां विस्तरः कारिकार्थस्तु प्रतिविषयाध्यवसायत्ते निश्ची
३ यते निषयीक्रियते नेनेतीन्द्रियजवृत्तिरूपं ज्ञानं प्रत्यक्षं लिंगलिंगिपूर्वकं स्वज्ञानकारणहेतुपदाज्ज्ञेयं साध्यज्ञानमनुमा
नं आप्तश्रुतिः आप्तेन शब्देन शाब्दबोध इति ५ इदानीं प्रमाणत्रयविषयानाह सामान्यतस्त्विति सामान्यतद्
तिपक्ष्यंतातसिः तथाचेन्द्रिययोग्यस्य सर्वस्यापि दित्तस्यानपेक्षितस्य च दृष्टात्प्रत्यक्षादेव सिद्धिः तेन मृत्पिण्डादीनां प्रत्यक्षा
देव सिद्धिरिति भावः अतीन्द्रियाणां प्रकृत्यादीनां सिद्धिरनुमानात् यथा महत्तत्त्वं सकारणकं कार्यत्वात् घटवदिति कारणा
न्तरबाधात्प्रकृतिसिद्धिः नच पुरुष एव जनकोऽस्तु तस्यापरिणामित्वेनाजनकत्वात् तस्मादपि परोक्षं अतीन्द्रियं यागस्वर्गसा
3 धनत्वादीति आप्तागमात् शब्दप्रमाणादित्यर्थः ६ ननु प्रकृत्यादौ प्रत्यक्षमेव कथं न प्रवर्तत इत्याशंकायां प्रत्यक्षाविष

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धं ६ अतिदूरा
त्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्च ७ ॥ ॥ ॥ ॥

ट नानूहेतूनाह अतिदूरादिति प्रत्यक्षं न प्रवर्तत इति शेषः अत्युच्चगतः पक्षी न दृश्यते दूरत्वदोषात् दोषश्चैकचित्क
च क्वचिदेव अन्यथा सूर्यादिमंडलदर्शनं न स्यादिति गुर्गोलकगतः कर्पूरादिरतिसामीप्यान्न गृह्यते अत्राप्यतिपदस्यान्वयः
इन्द्रियगोलकं तस्य घातान्नाशात् मनसोऽनवस्थानात् व्यासंगेन तदिन्द्रियसंयोगाभावात् सौक्ष्म्यादिन्द्रियायोग्यत्वा
त् व्यवधानात् कुड्यादेः अभिभवो बलवत्सजातीयसंबंधः यथा सौरालोकाभिभवाच्चन्द्रप्रभा न गृह्यते समाना राम:
भिहारः समगुणानां मिश्रणं यथा माहिषादिदुग्धे पतितं गव्यदुग्धं न गृह्यते ७ ॥ ॥ ॥ ॥
३

प्रमाणानां लक्षणान्याह प्रतिविषयेति प्रतिविषयो नियतविषयोऽध्यवसीयते निश्चीयते अनेनेति प्रतिविषयाध्यवसायं दृ
ष्टं च चक्षुरादीनां रूपादिविषयकत्वनियमात् नियतविषयकत्वं ननु कारणेन मेघादिना कार्यस्य वृष्ट्यादेर्ज्ञानं कार्येण धूमादि
ने ना कारणस्य वह्न्यादेर्ज्ञानं न प्रत्यक्षत्वात् प्राचंते केन प्रमाणेन जनयितव्येत्याह त्रिविधमिति तथा चानुमान एव तयोः प्रवेशः तथा
चानुमानमतन्त्रं अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववत् शेषवत् सामान्यतो दृष्टं चेति तत्पूर्वकं व्याप्त्यादिप्रत्यक्षपूर्वकं पूर्ववत् कारणेन त्य
कार्यानुमानं शेषवत् कार्येण कारणानुमानं सामान्यतो दृष्टं कार्यकारणान्यलिंगकं यथा वा पूर्यतीतचंपकभागोऽस्यादि
मात्रं गंधादितिं त्रितयसाधारणमनुमानलक्षणमाह तल्लिंगेति तस्य साध्यस्य लिंगं व्याप्यं लिंगं यत्र विद्यते स लिंगी आ
च श्रयवान् पक्षः पूर्वकारणं यस्य प्रत्यक्षस्य तत्तथा तत्साध्यव्याप्यविशिष्टपक्षप्रत्यक्षं वह्निव्याप्यधूमवान्पर्वत इत्या

प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातं तल्लिंगलिंगिपूर्वकमाप्तश्रुतिराप्तवचनं तु ५

द्याकारः परामर्शोऽनुमानमनुमितिकरणत्वादित्यर्थः शब्दलक्षणं वक्तुमाह आप्तवचनमिति आप्तं च तद्वचनं चेत्याप्तवच
नं आकांक्षासन्नियोग्यतावत्पदकदंबकं लक्ष्य निर्देशोऽयं आप्तश्रुतिरिति लक्षणं प्रकृतवाक्यार्थगोचरयथा
र्थज्ञानवानाप्तः श्रूयत इति श्रुतिर्वाक्यं तथा चाप्तोक्तं वाक्यत्वमिति लक्षणं आप्तपदं बालकादिवाक्यार्थवारणाय तु संप्रदसं
रख्यमतेऽप्यरसवाप्तः अन्यमतेन तु तत्प्रमाणमिति संक्षेपः वस्तुतस्तु स्वमते इंद्रियादिकं न प्रमाणं किंतु इंद्रियादिजन्या
वृत्तिरेव तथाहि अविसंवादिज्ञानमनधिगततत्त्वबोधो वा प्रमा तत्करणं तस्या अयोगव्यवच्छेदेन संबंधितदेव प्रमाणं सामा
न्यलक्षणं तत्रेंद्रियसंचारमार्गेण बाह्यवस्तुसंबंधाच्चित्तस्येंद्रियसंनिकृष्टार्थविशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं य
था घटोऽयमित्यादि गृहीतव्याप्तिकेन हेतुना साध्यवति पक्षे ज्ञायमानेन साध्यविजया वृत्तिरनुमानं यथा पर्वतो वह्निमानित्या
दि आप्तोक्तेन शब्देन [illegible] मानावेलोयोगः कार्यस्त्विति अ

शक्तस्य शक्यकरणादिति कार्यशक्तिमत्त्वमेवोपादानत्वं अन्यस्य दुर्वचत्वात् शक्तिश्च कार्यस्यानागतावस्थैव अपरिनिष्ठितत्वे तस्याः का
सां०च०कौ० ५ ...र्यासंबद्धत्वेऽव्यवस्थासंबंधत्वेनासतासंबंध इति शक्तस्य शक्यकरणादपि सत्कार्यमित्यर्थः हेत्वंतरमाह कारणभावाच्चेति तद्धेदं तर्ह्य
व्याकृतमासीदित्यादिश्रुतेरुत्पत्तेः प्रागपि कार्यकारणाभेदश्रवणेन कार्यस्य कारणात्मकत्वादपि सत्कार्यं असत्त्वे हि सदसतोरभेदानुपपत्ते
रित्यर्थः अपि च लोके यदात्मकं कारणं तदात्मकं कार्यमिति दृष्टं यथा कोद्रवेभ्यः कोद्रवाः व्रीहिभ्यो व्रीहयो जायंते यदि चासत्कार्यं स्या
त्तदा कोद्रवेभ्यो व्रीहीणां व्रीहिभ्यश्च कोद्रवाणामुत्पत्तिः स्यात् न च दृश्यते तस्मात्कार्यस्य कारणात्मकत्वादपि सत्कार्यमिति न च
तर्हि कार्यस्य नित्यत्वप्रसक्त्या सामग्रीवैयर्थ्यप्रसंग इति वाच्यं सामग्र्या अभिव्यक्त्यर्थत्वात् न चाभिव्यक्तेरपि जन्यत्वे सत्कार्यवा
दबाधः स्यात् नित्यत्वे सदैवाभिव्यक्तिः स्यात्तस्या अप्यभिव्यक्त्यपेक्षायामनवस्थापत्तिरिति वाच्यं व्यवहारोपयोगित्वं तत्का

4

शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम् ॥९॥ हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिंगं सावय
वं परतंत्रं व्यक्तं विपरीतमव्यक्तं ॥१०॥ याभिव्यक्तेः सत्त्वं तत्कार्यनिष्ठसत्त्वगुणरूपत्वेनानित्यत्वेपि तमसा प्रतिबद्धवस्तु
व्यवहारोपयोगित्वं अभिव्यंजकसामग्र्यात् तेजकेन मणेरिव तमसः प्रतिबंधाद्व्यवहाराक्षमत्वमिति सामग्र्याश्चेतकत्व
मात्रांगीकारात्सत्कार्यवादबाधाभावात् तस्मात्कार्यकारणयोरभेदेपि व्यवहाराक्षमता कार्यात्मनोऽभिव्यक्तस्यैव नान्यथा
ऽतो न कोपि दोष इत्यास्तां विस्तरः ॥ तत्र पूर्वस्यामार्यायां महदादिकार्यं प्रकृतिविरूपं सरूपं चेत्युक्तं तदिदानीं विविधप्रज्ञा
नाय दर्शयति हेतुमदिति व्यक्तं महदादि पृथिव्यंतं त्रयोविंशतिसंख्यं हेतुमत्‌ हेतुः कारणं यस्याविर्भावितद्धेतुमत् कदाचिद् राम
विर्भावशीलं अनित्यं कदाचित्तिरोभावशीलं अव्यापि अ सर्वगतं विभुत्वे क्रियानस्यात् सक्रियं प्रवेशादिक्रियावत् बुद्ध्यादयो ६
हि एकं देहं त्यक्त्वा देहांतरं प्रविशंति अनेकं प्रतिपुरुषं भेदात् सजातीयभेदवत् तच्च चान्यस्याश्रयप्रतियोगिकान्योन्याभावसमाना
धिकरणतत्त्वविभाजकोपाधिमत्त्वं यातिचेदं महदादिषु महदादिप्रतियोगिकान्योन्याभावेन महत्त्वादेः समाना धि
करणत्वात् प्रकृतौ तु न यातिप्रकृत्यन्योन्याभावस्य प्रकृतावसत्त्वात् पुरुषे तत्प्रकृतित्वाभावात् पुरुषैव्याप्तिवारणाय त्रि ति
गुणत्वे सतीति विशेषणीयं [illegible] ते न नान्यत्रातिव्याप्तिः आ

नन्वेषामन्यतराधीनः सत्त्वज्ञाभाव इति भवदीयं मतं तन्न युक्तं त्र कृत्यादीनामभावनिबंधन एव स भविष्यतीत्यत्राह सौक्ष्म्यादिति सौ
क्ष्म्यात्निरवयवद्रव्यत्वेनेंद्रियायोग्यत्वात्तेषां प्रकृत्यादीनामनुपलंभो न प्रकृत्याद्यभावात् कुतः कार्यतस्तदुपलब्धेः कार्येण तेषां
सिद्धेः कार्यलिंगकतदनुमानस्याबाधितत्वादिति भावः किं कार्यं तत्राह महदादीति आदिपदात् अहंकारपंचतन्मात्राणि गगनादय
श्च तत्र स्वरूपं महत्त्वादि सत्त्वकं तत्त्वविभाजकोपाध्यवच्छिन्नजनकत्वात् विरूपं रागनादित्वादशाजनकत्वात् एतत् कथनं कार्यो
णां विवेकज्ञानाय सारासारविवेकेनात्मतत्त्वज्ञानजिज्ञासाद्वारा साधर्म्यं प्रकारकं कार्यं तत्त्वज्ञानस्य कैवल्यायप्रयोगित्वादित्यग्रे
स्फुटी भविष्यति ८ ननु तार्किकनये सतोऽसज्जायते तथा च यावत्कार्यं न जातं तावत्पर्यंतं कारणस्य प्रमाणाभावे नासत्वापत्तिः तथा च
कथं पश्चादपि तस्य सत्त्वं स्यात् न हि कार्येणासतः सत्त्वं वक्तुं शक्यते तत्राह असदिति कार्यं कारणव्यापारात् प्रागपि सदेव न तु तद्

भाव सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धेः महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च ८ असद
करणादुपादानग्रहणात्सर्वसंभवात् ॥ नीमसत् अत्र हेतुमाह असदकरणात् असतो नरशृंगतुल्यस्य प्रागविद्यमा
नस्योत्पादनासंभवात् अन्यथा नरशृंगस्यापि करणापत्तेः असत्त्वाविशेषात् हेत्वंतरमाह उपादानग्रहणात् उपादानं समवायि
कारणं तस्य कार्यार्थिना ग्रहणात् यथा दध्यर्थी क्षीरमुपादत्ते नान्यत् यदि चासत्कार्यं तर्हि दध्यर्थी उदकस्योपादानं कुर्यात्
न च कुरुते तस्मादुपादानग्रहणादपि ज्ञायते कारणे कार्यमस्तीति हेत्वंतरमाह सर्वसंभवात् लोके यद्यस्मिन्नस्ति तदेव तस्मा
ज्जायते इति वक्तुं शक्यं मृदादिभ्य एव घटादिदर्शनात् यदि चासत्कार्यं स्यात् तदा तत्सर्वं सर्वत्र संभवेत् असत्त्वाविशेषात् न
च यत्र यस्य प्रागभावोऽस्ति स एव तत्र जायते इति वाच्यं तंत्वानुत्पाददशायां पटप्रागभावः कुत्र स्यात् न च काल इति वाच्यं प्रा
गभावस्य क्रियाविरहेण तंत्वावागमनविरहे तंतुवृत्तित्वं न स्यात् न चैवं धिकरणतंतुरूप एव पटप्रागभावस्तर्ह्यधिकरणसावि
शेषात् घटादिप्रागभावरूपतापि स्यात् न च पटनिरूपितकारणत्वं नियामकं असतः पटादेर्निरूपकत्वादिधर्मासंभवात् सदस
तोः संबंधात् निरूपकत्वादेर्निरूपकस्वरूपत्वे तु न दोष इति तादवस्थ्यं कारणे कार्यासत्तायां तन्निरूपितकारणतामध्ये वनान्यत्रे

तिनियामकाभावादित्याद्यन्यत्र विस्तरः ॥

ल

सां०व्यं० ५ द नो

त्रिगुणमित्युक्तं तत्र किमात्मका गुणाः किमर्थाः किंप्रवृत्तयश्चेत्यत आह प्रीत्यप्रीतीति गुणाः सत्त्वरजस्तमांसि यथासंख्यं प्रीत्यादिरूपाः तत्र प्रीतिः सुखं तदुपलक्षणं आर्जवमार्दवह्रीश्रद्धाक्षमानुकंपाज्ञानादीनां अप्रीतिः दुःखं तदुपलक्षणं प्रद्वेषद्रोहमत्सरनिंदानिकृत्यादीनां विषादो मोहः तदुपलक्षणं विप्रलंभभयनास्तिक्यकौटिल्यकार्पण्याज्ञानादीनां यत्रैतदुपलभ्यते तत्र तादृग्गुणः अस्तीत्यवगंतव्यं इति भावः लक्षणमुक्त्वा प्रयोजनमाह प्रकाशेत्यादि प्रकाशोऽवभासः प्रवृत्तिश्चालनं नियमः प्रतिबंधोऽर्थः प्रयोजनं येषां ते तादृशाः तत्रावभासः सत्त्वेन चालनं रजसा प्रतिबंधस्तमसा तथाहि सत्त्वं रजसा चालितं कार्यं जनयेत् यथावरकेन तमसा नियम्येत तथा च तमसा प्रतिबंधात् तत्कार्यं देशे न भवति अतस्तत्प्रतिबंधस्तस्य प्रयोजनं बोध्यं अन्योन्येति अन्योन्यपदं वृत्तिपदं च चतुर्ष्वप्यन्वेति तथा चान्योन्याभिभववृत्तयः तथाहि सत्त्वमुत्कटं सत् रजस्तमसी अभिभूय शांतां वृत्तिं लभते एवं रजः सत्त्वतमसी अभिभूय घोरां एवं तमः सत्त्वरजसी अभिभूय मूढां अन्योन्याश्रयवृत्तयः अन्यतमो गुणः स्वकार्यार्थं अन्यावष्टंभसहकारिणौ कृत्वा प्रवर्तते अन्योन्य

5

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः १२
सत्त्वं लघु प्रकाशकमिष्टमुपष्टंभकं चलं च रजः गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः १३ ॥ ॥ ॥ ॥

जननवृत्तयः कार्यस्य त्रिगुणात्मकत्वादन्योन्यजनकाः सर्वे अन्योन्यमिथुनवृत्तयः स्त्रीपुरुषवदन्योन्यसंयोगशीलाः स्त्रयपि अत्रायं विशेषः एको यदाधिकस्तदा परौ दुर्बलाविति तथैव दर्शनात् १२ सत्त्वादीनामसाधारणं धर्मं विवेकोपयोगार्थमाह सत्त्वमित्यादि लघु लघुत्ववत् प्रकाशकं इंद्रियार्थसंनिकर्षे सति विषयावभासकं सत्त्वाधिक्ये तेषां गात्राणां लघुताया उपलब्धेरिंद्रियाणां विषयग्रहणसामर्थ्यदर्शनाच्च लघुत्वं प्रकाशकत्वं च सत्त्वस्य लक्षणं तत्र लघुत्वं कार्योद्गमनहेतुभूतो धर्मः इष्टं सांख्याचार्यैः उपष्टंभकं संश्लेषजनकं चलं सक्रियं रजसैव संश्लेषक्रिययोरुपलंभात् प्रेरकत्वं सक्रियत्वं च रजसो लक्षणमिति भावः गुरु गुरुत्ववत् वरणकं आवरकं तमसैवांगगुरुत्वविषयावभासप्रतिबंधयोर्दर्शनात् गुरुत्वं च तदिंद्रियव्यापारनिवृत्तिद्वारा तत्तत्कार्यप्रतिबंधकत्वं [illegible] एव तिलभ्यंते तथा च ते ऽपि

रामः ५

ष्ठितं त्रिमनयथा महत्तत्त्वं प्रधाने अहंकारो बुद्धौ पंचतन्मात्राण्यहंकारे भूतानि तन्मात्रेषु एवं यथासंभवमूह्यं लिंगं लिंगयति ज्ञाप
ग यतीति लिंगं अनुमापकं भवति हि कार्यमिदं कारणस्याव्यक्तस्यानुमितिजनकं भोग्यत्वाद्भोक्तुः पुरुषस्य चानुमितिजनकं सावयवं अ
वयवैर्गुणैर्युक्तं परतंत्रं साक्षात्परंपरया वा प्रकृत्यधीनस्वरूपपरिणामकं भवति एतद्धर्मं प्रकृतावाह विपरीतमिति अव्यक्तं प्रकृतिः वि
परीतं अहेतुमत्कारणत्वविपर्यातेस्तत्रैवांगीकारात् नित्यं अनुत्पत्तिधर्मकत्वात् व्यापि सर्वगत्वात् निष्क्रियं शांतादिक्रियाशून्यत्वात्
एकं सजातीयभेदशून्यं निराश्रितं कारणशून्यत्वात् अलिंगं कारणानुमापकं तेनास्य पुरुषानुमापकत्वेऽपि न हानिः निरवयवं अकारण
कत्वात् स्वतंत्रं कार्ये स्वयं समर्थत्वात् यद्यप्येते धर्माः पुरुषस्यापि तथापि गुणवत्त्वे सतीति विशेषणीयं तेन न तत्र नातिव्याप्तिरिति संक्षे
पः १० एवं व्यक्ताव्यक्तयोर्वैरूप्यमुक्त्वा सारूप्यमाह त्रिगुणमिति व्यक्तं महदादि प्रधानं प्रकृतिः त्रिगुणं सत्त्वरजस्तमांसि त्रयो गुणाः

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ११

~~यस्मात्त्रिगुणं ... गुणत्रय ... स्यात्तत्त्वात् महदादे~~
यस्य तत् त्रिगुणं तत्र प्रकृतेर्गुणत्रयसाम्यावस्थारूपत्वात् महदादेश्च प्रकृतिकार्यत्वेन गुणसंबंधात् अविवेकि प्रकृ
त्यभिन्नं तत्र महदादेः प्रकृत्यभिन्नत्वं कार्यकारणयोरभेदात् प्रकृतेस्तु स्वत एव विषयः ज्ञानभिन्नः न तु योगाचारमत
वज्ज्ञानाकारः तथा सत्येकस्य व... भोग्यत्वानस्यात् ज्ञानस्य तत्तदीयत्वात् तत्पुरुषमात्रवेद्यत्वात् सामान्यं गुणवत्त्वेन तुल्यं अप्रथा
भोग्यत्वेन सर्वपुरुषाणां पण्यस्त्रीवत्तुल्यं अचेतनं स्वप्रकाशचेतनाभिन्नं अनवभासकत्वात् प्रसवधर्मि प्रसवोऽन्या विधर्मा वि हेतु
त्वं धर्मो यस्य तत् ताद्दृशं यस्माद्बुद्ध्यादिकं महंकारादिकं प्रसूते प्रधानं तु बुद्धिं प्रसूते तदिदं सर्वं व्यक्ताव्यक्तयोः सारूप्यमुक्तं अ
धुना व्यक्ताव्यक्तयोः पुरुषस्य च साधर्म्यं वैधर्म्यं चाह तद्विपरीतस्तथा च पुमानिति ताभ्यां व्यक्ताव्यक्ताभ्यां विपरीतो विरूपो निर्गु
णत्वात् विवेकित्वात् न सामान्यत्वात् चेतनत्वात् अप्रसवधर्मित्वात् तथा च ... हेतुमत्त्वादिना एवं व्यक्तसदृशो

सां०चं० ६ स्ति प्रधानं अविभागाद्वैश्वरूप्यस्य अत्र स्वार्थे ष्यञ् विश्वरूपस्य त्रिलोकस्याविभागात् प्रलये कारणेनैकीभावरूपाल्लयादित्यर्थः ताहशकार
णं विना तेषां भिन्नानामेकीभावरूपो लय एव न स्यादितिभावः न च ब्रह्मैव ताहशं कारणमस्तु कृतं प्रधानेनेति वाच्यं तस्य शक्तिमत्त्वेन कारणत्वकल्पनापेक्ष
या शक्तित्वेन प्रधानकल्पनाया एवोचितत्वादिति संक्षेपः १५ ननु यद्येकं प्रधानं कथं तर्हि स्मादृविधकार्योत्पत्तिः न ह्येकतंतुतः पटो दृश्यते तत्राह कारणमि
ति यदव्यक्तं जगतः कारणमस्ति तत्त्रिगुणतः प्रवर्तते सत्वादिगुणत्रयात् प्रवर्तते कार्यं जनयतीति तथा च गुणत्रयात्मके प्रधाने बहुत्वमस्त्येवातो नानुपप
त्तिरितिभावः एकजातीयजनकता कथं तत्राह समुदायाच्चेति मेलनाच्चेत्यर्थः गुणप्रधानभावेन मिलित्वा चित्ररूपमिवैकं कार्यं जनयन्तीतिभावः भव
तु महदादिकार्यमेकजातीयं कार्यान्तरेषु वैषम्यं तु कुतस्तत्राह प्रतिप्रतीति एकैकगुणाश्रयेणायो विशेषस्तस्मादित्यर्थः गुणवैषम्यमितिभावः तत्र दृष्टान्तः परि
णामतः सलिलवदिति यथा सलिलमेकमपि नारिकेरजंबीरादिपरिणामभेदान्मधुरतिक्तादिभावं प्रतिपद्यते तद्वदिदमपि सहकारिभेदादेव विषममितिभावः १६

६ कारणमस्त्यव्यक्तं प्रवर्त्तते त्रिगुणतः समुदायाच्च परिणामतः सलिलवत् प्रति प्रतिगुणाश्रयविशेषात् १६ संघातपरार्थत्वात् त्रिगु
णादिविपर्ययादधिष्ठानात् पुरुषोस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च १७ ॥ प्रधाने प्रमाणमुक्त्वा पुरुषे प्रमाणमाह संघातेति पंच
म्यंतानां हेतूनां पुरुषोस्तीत्यनेनान्वयः संघातः पर्यंकसमूहस्तस्य शय्यादिवत् परार्थत्वात् परप्रयोजनार्थत्वात् प्रयोजनं च सुखदुःखान्यतरसाक्षात्
र कारूपो भोगस्तस्य च जडे व्याधाच्चेतनस्तत्र न पुरुषोस्तीत्युक्तिप्रमाणादिभावः हेत्वंतरमाह त्रिगुणादिविपर्ययादिति त्रयो गुणा यस्यास्ति सो त्रिगुणादिस्त
स्य त्रिगुणादेर्विपर्ययो भावस्तस्मात् त्रिगुणात् कार्यस्य जडत्वात् कार्ये विशेषे कारणत्वाच्च किंचिन्निष्ठाभावं प्रतिप्रतियोगित्वं घटादेरिवावश्यकं सर्व
स्य त्रिगुणस्याभावस्त्व त्रिगुणे पुरुष एव संभवति अतस्त्रिगुणाभावाधिकरणत्वेन पुरुषश्चावश्यक इतिभावः हेत्वंतरमाह अधिष्ठानादिति अधिष्ठा धि
तृत्वादित्यर्थः यथा रथः सारथिनाधिष्ठितः प्रवर्त्तते तद्वदिदमपि सर्वं जडत्वात् पुरुषाधिष्ठितमेव प्रवर्त्तते इत्यकामेनाप्यावश्यं वाच्यमतस्त्रिगुणा
धिष्ठाता यः पुरुषोस्तीतिभावः हेत्वंतरमाह भोक्तृभावादिति साक्षित्वादित्यर्थः यस्येदं व्यक्ताव्यक्तं सर्वं ब्रह्मसादि स्वत्वनुभवनीयं स पुरुष आव
श्यक इतिभावः हेत्वंतरमाह कैवल्यार्थं प्रवृत्तेश्चेति शिष्टानां मुक्तौ प्रवर्त्तमानां दृश्यन्ते मुक्तिश्च ब्रह्मसादिभुमध्ये न कस्यचिदपि संभवति त्रिगुण
त्वेन सुखदुःखमोहात्मत्वात् तस्मान्मुमुक्षुप्रवृत्त्युद्देश्यमोक्षाश्रयत्वेन पुरुषसिद्धिरिति संक्षेपः १७ ॥ ॥ ॥

परस्परविरुद्धानां कथमेकत्र प्रवृत्तिः संभवति परस्परविरुद्धानां गुणानां मे कार्यकारणानुपलंभात् तत्राह प्रदीपवदिति यथा तैलव
र्त्तिदीपानां परस्परविरोधेपि तैलवर्त्तिभ्यां सह दीपः प्रकाशं जनयति तद्वदित्यर्थः दीपोपवर्त्तितैलमतनेन दीपनाशात् तैलमपि दीपवि
रोधि एवं वर्त्तिरपि स्वल्पकेन दीपनाशिकेति १३ अविवेकित्वादिकं व्यक्तत्वादिसाधर्म्यमुक्तं तत्कथं तेषु सिद्धमित्यत आह अविवे
क्यादेरिति अत्राविवेक्यादेरिति धर्मपरः अविवेकित्वादिकं प्राङ्निरुक्तं महदादिष्वबाधितं कुतः त्रैगुण्यात् प्रकृतिवत् त्रिगुणत्वा
त्व्यतिरेकसहकारीणोवयेनुमानमिच्छति तान्प्रत्याह तद्विपर्ययेति तस्याविवेकित्वस्य विपर्ययो यत्र सत्तद्विपर्यय आत्मा तत्र
त्रैगुण्याभावात् तथा च यत्राविवेकित्वाभावस्तत्र त्रैगुण्याभाव आत्मवदिति व्यतिरेकव्याप्तिरस्त्येवातः ...।। नास्ति सिद्धिरप्रबाधि
तैवेतिभावः ननु प्रकृत्यभिन्नत्वं महदादीनामुक्तं प्रकृतिसिद्धिरेव तु कुतस्तत्राह कार्यस्येति महत्तत्वादीनां कारणभावेनित्व

अविवेक्यादेः सिद्धं त्रैगुण्यात्तद्विपर्ययाभावात् कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धं १४ भेदा
नां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य १५

त्वापत्त्यात्मनो नि
मीत्वाएवस्यादिति जन्यत्वमेवावश्यकं जन्यं च तत्समानजातीयगुणकारणकमेव वाच्यं तथैवानुभवात् कारणं च तन्नित्यमे
व तस्यापि कारणस्वीकारे नवस्थापत्तिस्यात् अतोऽव्यक्तं प्रधानं अपि नात्रैगुण्यं च सिद्धमित्यर्थः १४ महादादिभ्यो भेदेन
८३ प्रधानं हेतुभिः साधयति भेदानामिति कारणमस्त्यव्यक्तमित्युत्तरेणान्वेति भिद्यंत इति भेदाः महदादयस्तेषां परिमाणात् परिमितत्वात् अव्यापि
त्वात् अनेकत्वस्य भेदवत्त्वात् यद्यदनेकमव्यापि च तत्तत्कार्यं भवति च महदादिकं प्रतिपुरुषनियतत्वादनेकमव्यापि च अतस्तत्कारणं योग्यतया
नित्यमेकं प्रधानमेवेतिभावः हेत्वंतरमाह समन्वयात् सुखदुःखमोहान्वितत्वस्य समानधर्मवत्त्वादित्यर्थः व्यावृत्तानमेकं तत्समानस्वभावैककारण
कत्वमावश्यकं तच्च कारणं योग्यतया प्रधानमेवेतिभावः इतश्चास्ति प्रधानमित्याह शक्तितः प्रवृत्तेश्चेति शक्तित्वादेव कार्यानुकूलप्रवृत्तिसंभवात् कार म
णानां शक्तिश्च प्रकृतिरेवाष्टाविकायतः कार्यं महद्भवति यथा ... इति भावः इतश्चास्ति प्रधानमित्याह कारणकार्यविभागादिति कारणे
सतः कार्यस्यैव कूर्मांगानामिव निःसारणं ... धर्ममायादिरूपविभागान्महदादि कार्यस्यतादृशताद्दशावस्याहेतुरव्यक्तमेवेतिभावः इतश्चा

सां०चं० किमर्थं तयोः संयोगस्तत्राह पुरुषस्येति पुरुषस्यप्रधानस्य चोभयोरपिसंयोगो दर्शनार्थं कैवल्यार्थं चेत्यन्वयः दर्शनं भोगः प्रधानस्यपुरुषेण कै
८ वल्यंमोक्षः सत्त्वपुरुषान्यताख्यातिनिबंधनः पुरुषस्यप्रधानेनविनाऽसंभवात्तयोः प्रधानपुरुषयोर्द्वयोः संयोगोभोक्तृभोग्यभावकरसंनिधानंभ
वतीत्यर्थः उभयस्यकार्ये उभयस्यैवापेक्षेत्यत्रदृष्टांतः पंग्वंधवदिति यथापंग्वंधयोरेकत्रमेलनेपंगुरंधस्यमार्गप्रदर्शनायांधश्चपंगोर्नयनायभ
वतितद्वदित्यर्थः भोगापवर्गयोर्लाभतः सर्गोपिसंयोगादेवेत्याह तत्कृत इति महदादिलक्षणः सर्गसंयोगजन्यएवेत्यर्थः अतएवप्रलयेनसर्गः
नयोस्तादृशसंयोगाभावादितिभावः २१ सर्गक्रममाह प्रकृतेरिति अत्रेयंप्रक्रियाएकंप्रकृतितः किंचिन्न्यूनपरिमाणंमहत्तत्त्वमंशांशिभावापन्नंजाय
तेतत्रांशाः बुद्धितत्त्वाख्याःआत्मसमसंख्याः शरीरप्रवेशार्हपरिमाणकाजीवभोगायभवंतितेषांमापूरिकाप्रकृतिरेवएवमहंकारोमहत्तत्त्वाद
ल्पपरिमाणोंशांशिभावापन्नोभवतितत्रांशाः सूक्ष्माआत्मसमसंख्यास्तएवतद्भोगायभवंतिषोडशकोगणस्तुएकादशेंद्रियाणिवक्ष्यमाणानि

7 पुरुषस्यदर्शनार्थंकैवल्यार्थंतथाप्रधानस्य पंग्वंधवदुभयोरपिसंयोगस्तत्कृतः सर्गः २१ प्रकृतेर्महान्ततोहंकारस्त
स्माद्गणश्चषोडशकः तस्मादपिषोडशकात्पंचभ्यःपंचभूतानि २२ शब्दादीनिपंचतन्मात्राणिच तस्मादपिषोडशकात्तंषो
डशकंमध्यस्थितेभ्यःपंचभ्यःपंचतन्मात्रेभ्यःपंचमहाभूतानिभवंतितत्रशब्दतन्मात्रादाकाशंतस्यशब्दोगुणः शब्दतन्मात्रासहितात्स्प
र्शतन्मात्राद्वायुःशब्दस्पर्शगुणवान्शब्दस्पर्शतन्मात्रासहिताद्रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगुणकंशब्दस्पर्शरूपतन्मात्रासहिताद्रसतन
त्र३ मात्राज्जलंशब्दस्पर्शरूपरसगुणंशब्दस्पर्शरूपरसतन्मात्रासहिताद्गंधतन्मात्रात्पृथ्वीशब्दस्पर्शरूपरसगंधगुणा अत्रसंग्रहः वियदेकगु
णंप्रोक्तं द्विगुणोमातरिश्वनः त्रयस्तेजसिचत्वारः सलिलेपंचभूमिगाइति अहंकारादेवपंचमहाभूतानिभवंत्वितितु नवक्तुंशक्यंश
ब्दादिगुणकानांतेषामहंकारतउत्पत्तेरसंभवात् अहंकारस्यशब्दाद्यभावात्नचाहंकारस्यपंचगुणवत्त्वेमानमस्तितथासत्याकाशादीनांपंचानामे
वपंचगुणवत्त्वंस्यात् एवंबाह्येंद्रियग्राह्यगुणवत्त्वस्यैवभूतत्वेनतस्यापिभूततापत्तौस्वस्यस्वकारणत्वानुपपत्त्यातस्यभूतकारणत्वश्रुतिवि
रोधश्चस्यात् नचाहंकारस्यशब्दाद्यभावेकथंतस्माच्छब्दादितन्मात्रोत्पत्तिर्वक्तुंशक्येतिवाच्यं सविशेषगुणवद्द्रव्योपादानकत्वव्याप्त्येनस्थूलत्वेन
परिशेषात्सूक्ष्मद्रव्यारंभत्वानुमानादहंकारोपादानकत्वेतस्मादित्याद्युक्तमवितत्रः तन्मात्रत्वंचयज्जातीयेषुशांतघोरमूढाख्यविशेषत्रयं
नतिष्ठतितज्जातीयतदनाश्रयशब्दस्पर्शरूपरसगंधाश्रयसूक्ष्मद्रव्यत्वंशांतसुखात्मकंघोरदुःखात्मकंमूढंमोहात्मकंतन्मात्राणिचदेवादि

योगपद्येनकैवल्यसुखलाभकानिषुबहुलाद्विकाशानिहस्सन्धनाल्यायेन
तथाहिमाणमहायोगासत्वमितितत्त्वं २२॥

८

ध.७

तदेवंपुरुषास्तित्वंप्रतिपाद्यतस्यबहुत्वंप्रतिपादयति जन्ममरणेति पुरुषबहुत्वंसिद्धंकस्मात्जन्ममरणकरणानांप्रतिनियमात् आत्मनिदेहसंबंधोज
न्मतत्त्यागएवमरणंकरणानि चक्षुरादीनितेषांप्रतिनियमः प्रत्येकमेवदर्शनंतस्मादात्मनएकत्वेतत्स्यात्एकस्मिन्जातेमृतेवासर्वएवजाताम्रतावा
स्युः एकस्मिनन्धेचक्षुष्मतिसर्वएवसचक्षुषः स्युः एकेनदृष्टेसर्वेद्रष्टारः स्युः नचतथातस्माद्बहवःपुरुषाइतिभावः हेत्वंतरमाह अयुगपत्प्रवृत्तेश्चेतिए
कस्यधर्मेऽन्यस्यज्ञानेन्यस्यवैराग्येन्यस्यैश्वर्येन्यस्यकामादावितिएवंप्रवृत्तिभेदादित्यर्थः आत्मनएकत्वेसर्वेषामेकस्मिन्नेवार्थेयुगपत्प्रवृत्तिः
स्यात्नचतथातस्मादपिबहवःपुरुषाइतिभावः हेत्वंतरमाह त्रैगुण्यविपर्ययाच्चैवेतिएवकारोभिन्नक्रमः सिद्धमित्यस्यानंतरंद्रष्टव्यं सिद्धमेवनासिद्धं त्रयोगु
णास्त्रैगुण्यंतस्यविपर्ययःपरिणामभेदःक्वचित्सुखमेवक्वचिद्दुःखमेवक्वचिन्मोहएवेत्येवंविधस्तस्मात्तथात्रैगुण्येनविपर्ययोभेदःसात्विकराजसतामस
भेदोनपुरुषस्यतस्मादेकत्वपक्षेतुतत्स्यात्किंतुसर्वेसुखिनोदुःखिनोवास्युः एवंत्रिगुणाभेदेननीचोत्तममध्यमव्यवस्थापिनस्यात् नचात्र करणभेद
तथेतिवाच्यमत्रतः

जन्ममरणकरणानांप्रतिनियमादयुगपत्प्रवृत्तेश्च पुरुषबहुत्वंसिद्धं त्रैगुण्यविपर्ययाच्चैव १८ तस्माच्चविपर्यासात्सिद्धं
साक्षित्वमस्यपुरुषस्यकैवल्यंमाध्यस्थ्यंद्रष्टृत्वमकर्तृभावश्च १९ तस्मात्तत्संयोगादचेतनंचेतनावदिवलिंगं गु
णकर्तृत्वेपितथाकर्तेवभवत्युदासीनः २०॥) (तथेतिवाच्यमत्रतः करणभेदेपुरुषभेदस्यैवजी
वात्वात् अन्यथातद्भेदस्याप्रमाणिकत्वादितिभावः १८ एवंपुरुषबहुत्वंप्रसाध्यविवेकज्ञानोपयोगितयातस्यधर्मानाह तस्मा
दितित्रिगुणादेर्योविपर्यासोऽत्रिगुणत्वंविवेकित्वमविषयत्वमसाधारणत्वमप्रसवधर्मित्वंचतस्मात्त अचेतनत्वाद्द्रष्टृत्वंस
प्रकृतिशीलज्ञातृत्वंप्रकृतिर्ममसंसारंकारयतिनत्वहंसंसारवान् किं तुपुष्करपलाशवन्निर्लिप्तइतिभावः अत्रैगुण्यात्कैवल्यंआत्यंतिकदुःख
ध्वंस वंतथामाध्यस्थ्यंउपकारापकारशक्तिरहितत्वंअकर्तृत्वंदृष्टादेवप्रयत्नादिरहितत्वंअनावसादित्वंज्ञानैकस्वरूपत्वंकर्तृत्वादि
मत्वेतदवभासकज्ञानैकस्वरूपोनस्यात्तद्धर्मिणःस्वस्यैवदीपस्यघटादौतदवभासकत्वदर्शनादितिसंक्षेपः १९ ननुकृतिबुद्धि
तत्वनिष्ठाचैतन्यमात्मनिष्ठंकथंतर्हिजानाम्यहमिदंकरोमीतिकृतिचैतन्ययोःसामानाधिकरण्यप्रतीतिस्तत्राह तस्मादितिपतस्मात्तत्स्यक
र्तृत्वेभिन्नाधिकरणकेयुक्तिनः सिद्धे [illegible] सन्निधानंप्रतिबिंबत्वंतस्मादचे
तनमपिलिंगबुद्धितत्वंचेतनवदिवजानामीतिज्ञानवदिवभवतिएवंगुणाकर्तृत्वेगुणाःसुखदुःखमोहरूपाःकर्तृत्वंचतथाबुद्धिनिष्ठमा
त्मनिप्रतिबिंबितंभवतितेनोदासीनोपिपुरुषःकरोमीतिकर्तेवभवति
अत्राहंजानाम्यहमिदंकरोमीतिधर्म्ययोर्धर्मिणोर्भेदाग्रहाद्विनिमयेनध
र्मसंसर्गग्रहरूपोभ्रमएवंतयोस्तथात्वनिष्पत्त्यादितिसंक्षेपः २०

ननु कथमेकस्मादहंकाराद्द्विविधः सर्गस्तत्राह सात्त्विक इति प्रकाशलघिमभ्यामेकादशक इन्द्रियगणः सात्त्विकं उद्रिक्तसत्त्वगुणकात् वैकृतात् वैकृतोयमहंकार इति सांख्याचार्यसंकेतविषयादहंकारात्प्रवर्त्तते भूतादेस्तामसादुद्रिक्ततमोगुणकादहंकारात्तन्मात्रको गणः प्रवर्त्तते कस्मात्तयतः स तामसः तामसगणस्य समानजातीयकारणादेवोत्पत्त्युचितत्वात् ननु यदि सत्त्वतमोभ्यामेव कार्यं तदा रजसः किं प्रयोजनं तत्राह तैजसादुभयमिति उत्कटरजोगुणकादुभयं गणद्वयं भवति सत्त्वतमसोः स्वतोऽक्रियत्वेन रजःप्रेर्यत्वात्तदुभयकार्ये रजःकार्यमेवातो रजोगुणोप्यावश्यक इति भावः तत्रेन्द्रियजनकस्य वैकृतत्वकथनं लघुकार्यजनकत्वाभिप्रायकं तन्मात्रजनकस्य भूतादित्वकथनं तामसत्व महाकार्यजनकत्वाद्यभिप्रायकं रजोगुणस्य तैजसत्वकथनं स्वष्टिसमर्थत्वाभिप्रायकमिति बोध्यं २५ एकादशेन्द्रियाणां मध्ये दश बाह्येन्द्रिया

सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहंकारात् भूतादेस्तन्मात्रः स तामसस्तैजसादुभयं २५ बुद्धीन्द्रियाणि चक्षुःश्रो
त्रघ्राणरसनत्वगाख्यानि वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः २६ ॥ ॥ ॥ ॥ ॥

8

णि तान्याह बुद्धीन्द्रियाणीति शब्दस्पर्शरूपरसगंधा बुध्यन्ते एभिरिति बुद्धीन्द्रियाणि चक्षुरादीनि रूपाद्युपलब्धिहेतुत्वेन सिद्धान्यतीन्द्रियाणि तत्र गोलकाधिष्ठितानि तत्र चक्षुः चष्टेऽनेनेति व्युत्पत्त्या चक्षुःपदाभिधेयं नयनं रूपादिषु मध्ये रूपस्यैव ग्राहकं श्रोत्रं शृणोत्यनेनेति व्युत्पत्त्या श्रोत्रपदाभिधेयं कर्णविवरसंज्ञकं शब्दादिषु मध्ये शब्दस्यैव ग्राहकं घ्राणं जिघ्रत्यनेनेति व्युत्पत्त्या घ्राणपदाभिधेयं गंधादिषु मध्ये गंधस्यैव ग्राहकं रसनं रसयत्यनेनेति व्युत्पत्त्या रसादिषु मध्ये रसस्यैव ग्राहकं त्वक् स्पर्शं स्पृशत्यनेनेति व्युत्पत्त्या स्पर्शपदाभिधेयं त्वक्स्थानीयत्वात् त्वगिन्द्रियं सर्वशरीरव्यापि स्पर्शादिषु मध्ये स्पर्शस्यैव ग्राहकं तत्र त्वक्चक्षुषी द्रव्यस्यापि ग्राहके अन्यानि तु गुणमात्रग्राहकाणीति विवेकः वागादीनि कर्म कुर्वन्तीति कर्मेन्द्रियाणि तानि विभाव्यन्ते एतेषां सर्वेषामिन्द्रियसंज्ञा कुत इति चेत् इंपदेन विषयास्तान्प्रति द्रवन्तीति व्युत्पत्त्येति गृहाण चक्षुरादीनां तत्तद्भूतगुणग्राहकत्वेन तद्गुणवत्त्वेन तत्तद्भूतारब्धत्वानुमानं तु न साधीयः अप्रयोजकत्वादिति स्वयमूह्यं २६ ॥ ॥ ॥ ॥ ॥ राम:

व

बुद्धेर्लक्षणमाह। अध्यवसायो बुद्धिरिति अध्यवसायो मयेदं कर्त्तव्यमित्याकारनिश्चयो दीपस्य शिखेव बुद्धिपरिणामोवस्थाविशेषः परिणामपरिणामिनोरभेदादभेदप्रयोगः चैतन्यस्यमदैकस्वभावस्य विषयावभासवैचित्र्यार्थं बुद्ध्याणां व्यासंगोपपत्तये मनसः मदिष्टसाधनत्वबुद्धेर्मदंशमाननायाहंकारस्य कृत्यसाध्येच्छादौ प्रवृत्तिवारकस्य कर्त्तव्यत्वाध्यवसायस्य संभवाय बुद्धितत्त्वस्यावश्यकत्वमिति स्वयमूह्यं बुद्धिधर्मानाह धर्मो ज्ञानमिति धर्मो गंगास्नानादिजन्यो ऽष्टांगयोगजन्यश्च ज्ञानं प्रमात्मसाक्षात्कारः विरागो वैराग्यं तच्चतुर्विधं यतमानव्यतिरेकैकेन्द्रियवशीकारसंज्ञाभेदात् तत्र रागादिकषायपाचनार्थं निवृत्तिधर्मारंभो यतमानं पक्वापक्वानां दोषाणामभ्यस्यमानविवेकबलेन चिकित्सकवन्नेदकारणं व्यतिरेकः पक्वसर्वकषायज्ञानेन चित्तौत्सुक्यतया एकेन्द्रियं सर्वविषयतृष्णाहितेषु तौत्सुक्यस्यापि निवृत्तिर्वशीकाराख्यं ऐश्वर्यमिति तदष्टविधं तदुक्तं अणिमा महिमा चैव लघिमा प्राप्तिरिन्द्रियैः प्राकाम्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता गुणेष्वसंगो वशिता यत्कामस्तदवस्यतीति सूत्रैः शरीरस्य अणिमा अणुत्वं

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यं सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तं ॥२३॥ अभिमानोहंकारस्तस्माद्द्विविधः प्रवर्त्तते सर्गः ऐन्द्रिय एकादशकस्तन्मात्रापंचकश्चैव ॥२४॥

महिमा योजनादिव्यापित्वं लघिमा तूलादिवल्लघुत्वं भूमिष्ठ एवांगुल्यग्रेण चंद्रमसं स्पृशतीत्यादिरूपसामर्थ्यमिंद्रियैः प्राप्तिरित्युच्यते श्रुतदृष्टेषु प्राकाम्यमिच्छानभिघातः यथा भूमौ जलेष्विव निमज्जतीत्यादि ईशिता तु भूतभौतिकानां सर्वेषां संकल्पमात्रेण प्रेरणं वशिता गुणाभेलाघृतधीनतासत्यसंकल्पता यत्कामस्तदवस्यतीति तत्प्राप्नोतीत्यनेनोक्ता सत्तद्विपर्यस्तं एतद्विपरीतं अधर्माज्ञानावैराग्यानैश्वर्यरूपं तत्राधर्मः परस्त्रीसंगादिजन्यः अज्ञानं अनित्ये स्वर्गादौ नित्यबुद्धिः अशुचौ स्त्रीकायादौ शुचिबुद्धिः दुःखे संसारे सुखबुद्धिः अनात्मनि देहादावात्मबुद्धिर्गौरोहमित्यादिका अवैराग्यं विषयतृष्णा अनैश्वर्यं स्वाभिप्रेतविपरीतं ॥ अहंकारस्य लक्षणमाह अभिमानोहंकार इति अभिमानोहं॰ मित्यन्तर्भावेन प्रत्ययोऽभिमानं जानामि करोमि मदिष्टसाधनमिदमत्राहमधिकृत इत्याद्याकारस्तस्य हेतुः कार्यकारणयोरभेदादभिमानोहंकारः अहमित्यव्ययं पुरुषं अहमिति व्यपदेशं करोतीति निनादशस्तन्निव्यमहंकारत्वं भेदाग्महानपुरुषेपि भासते न तु सोप्यहंकार इत्यभिप्रायः तस्य कार्यभेदमाह तस्माद्द्विविध इति तस्मादहंकारात्सर्गः सृज्यत इति सर्गः प्रपंचः षोडशकगणरूपश्चान्तरव्यूहभेदेन द्विप्रकारः अथ [illegible] प्रकारद्वयमाह ऐंद्रिय इति तस्मादहंकारादैन्द्रियः इंद्रियजातीय एकादशकोगणः एकादशसंख्याको व्यूहश्च पुनः तन्मात्रापंचकस्तन्मात्राजातीयः एककोगणान्तरव्यवच्छेदकः ॥२४॥

सं०चं० मान्या असाधारणी सामान्यामाह सामान्येति सामान्या चासौ करणवृत्तिश्चेति सामान्यकरणवृत्तिः पंच प्राणाद्या वायवः जीवनादिद्वारा सर्वकरणव्या श
९ ज पारवृत्तिलाभात्तदन्वयव्यतिरेकानुविधायित्वात् इंद्रियव्यापारस्य च तद्भावाभावान्वयानुविधायित्वात् प्राणादीनां भेदः स्थानभेदात् कौरंध्रेषु यः प्राह
दि प्राणो गुदे ऽपानः समानो नाभिदेशगः उदानः कंठदेशे स्याद्व्यानः सर्वशरीरगः इत्यास्तां विस्तरः २९ ॥ असाधारणेषु व्यापारेषु यौगपद्य
क्रमौ चाह युगपदिति दृष्टे प्रत्यक्षविषये तस्य चतुष्टयस्य बाह्येंद्रियमनोहंकारमहत्त्वस्य युगपद्वृत्तिः क्रमशश्च भवति तथाहि विद्युत्संपात
व्याघ्रादाविंद्रियसंनिकर्षे युगपदेव निर्विकल्पकसविकल्पकाभिमानाध्यवसायाः प्रादुर्भवंति अतस्ततो ऽटित्यपसरति क्रमशश्च यदा मं
दालोके प्रथमं किंचिदिदमिति जानाति पश्चादमुकमिति निश्चिनोति ततो मां प्रत्येतीत्यभिमन्यते अथ अध्यवस्यति अपसरामीतः स्थानादित्येवं क्र
मेणैते प्राग्व्यापारा भवंति तथा ऽदृष्टे परोक्षविषये पि त्रयस्य इंद्रियरहितत्रयस्य युगपत्क्रमशश्च व्यापारा ज्ञेयाः अनुमानशब्दयोर्वि

युगपच्चतुष्टयस्य हि वृत्तिः क्रमशश्च तस्य निर्दिष्टा । दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ३० स्वां स्वां प्रति
पद्यंते परस्पराकूतहेतुकां वृत्तिं पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणं ३१ ॥ ॥ ॥ ॥ ॥

१ षये इंद्रियाप्रवृत्तेस्त्रयस्येत्युक्तं तयो विषये निर्विकल्पकाभावात् प्रथमं मनस एव व्यापारः अनुमानशब्दे विषये वृत्तिरित्तत्पूर्वि
केति विशेषः अनुमाने व्याप्तिज्ञानार्थं प्रत्यक्षापेक्षा शब्दे शक्त्यानुमानापेक्षया प्रत्यक्षापेक्षेति संक्षेपः ३० ननु यौगपद्ये न संभव
ति इंद्रियव्यापाराधीनप्रवृत्तिकत्वान्मनसः एवमहंकारमहतोर्मनोहंकारव्यापाराधीनव्यापारकत्वात्तत्राह स्वां स्वामिति आकूतमभि
प्रायः स चाचेतनानां बाधित इत्याकूतमत्र प्रवृत्त्युन्मुखत्वं तच्चैकस्य व्यापारजननसमय एव तथा चासति बाधकेन्यस्यापि सकाल इति
यौगपद्यं संभवति क्रमपक्षे संशयादिरेव बाधक इति बोध्यं स्वां स्वां प्रतिपद्यंत इत्यनेन युगपत्प्रवृत्तावपि याच्छिक शाब्दिकानामिव हेतु
भेदान्न वृत्तिसंकर इति ज्ञापितं तथापि करणं केन प्रेर्यते तत्राह पुरुषार्थेति भोगापवर्गलक्षणः पुरुषार्थ एव स्वविषयकेच्छाद्वारा
करणव्यापारहेतुरित्यर्थः कार्यते प्रेर्यते तेन प्रेच्छावान् जीवः कर्ता आत्मकः ईश्वरस्तु न तदपेक्षायां मानाभावादिति भावः ३१ ॥

एकादशमिंद्रियं मनस्तल्लक्षणमाह उभयात्मकमिति मनस्संज्ञकमिंद्रियं संकल्पकं सामान्यतः इंद्रियेणालोचितं वस्तु इदमित्थं नेत्थमिति सम्यक् कल्पयति विशेषणवि
शेष्यभावेन चेतयतीति विशिष्टधीजनकं कार्यकारणयोरभेदात्तदात्मकं अत एवोभयात्मकं बुद्धींद्रियसहकारित्वात्तदात्मकं कर्मेंद्रियसह
कारित्वात्कर्मेंद्रियात्मकं च मनो धिष्ठानेनैवैते यांस्वकार्यजननात् ननु भवतु मनो महदहंकारवत्तन्नांद्रियसहकारिपरंतु तद्देव
नेंद्रियं भवितुमर्हतीति तावन्मात्रेणात्तस्येंद्रियत्वेति प्रसंगात्तत्राह इंद्रियं चेति कुतः साधर्म्यात् इंद्रियांतरैः सात्विकाहंकारोपादानत्वसा
धर्म्यात्तस्मात्महदहंकारयोस्तु नेंद्रियत्वं तथात्वाभावादिति भावः एतेन मनो नेंद्रियं प्रत्यक्षत्वादिंद्रियस्य चातींद्रियत्वादिति वदतां केषां
चिन्मतं न सम्यगिति ध्वनितं इंद्रियलक्षणस्य तत्त्वमतेप्यक्षतसाधर्म्यस्यातींद्रियत्वविशेषणागमिनत्वादित्यास्तां विस्तारः ननु कथं सात्विका
दहंकारादेकस्मादेकादशेंद्रियाणीत्यत्राह गुणपरिणामेति गुणानां सत्वादीनां यः परिणामविशेषोऽदृष्टविशेषादिरूपस्तस्मात्तत्पाचस

उभयात्मकमत्र मनः संकल्पकमिंद्रियं च साधर्म्यात् गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च २७॥ रूपादिषु पंचाना
मालोचनमात्रमिष्यते वृत्तिः वचनादानविहरणोत्सर्गानंदाश्च पंचानां २८ स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या
सामान्यकरणवृत्तिः प्राणाद्या वायवः पंच २९
हकारिभेदात्कार्यभेद इति भावः बाह्यभेदाश्चेति दृष्टांतार्थं यथा बाह्यभेदास्तथैतदपी
ति भावः बाह्यभेदाच्चेति पाठे तु ग्राह्यभेदादपींद्रियभेदश्चावश्यको बोध्य इत्यर्थः २७ तत्र बाह्येंद्रियेषु ज्ञानेंद्रियाणां व्यापारमाह रूपादि
ष्विति पंचानां बुद्धींद्रियाणां चक्षुरसनाघ्राणश्रोत्रत्वचां रूपादिषु रूपरसगंधशब्दस्पर्शेषु आलोचनं निर्विकल्पकं वृत्तिः फलं मात्रपदाद
र्शनादिक्रियाव्यवच्छेदः तत्र चक्षुषो रूपे रसनाया रसे घ्राणस्य गंधे श्रोत्रस्य शब्दे त्वचः स्पर्शे सामर्थ्यमिति विवेकः कर्मेंद्रियव्यापारमाह वचनेति
पंचानां कर्मेंद्रियाणां वचनादिकर्माणि व्यापारा इत्यर्थः तत्र वचनं उच्यतेनेनेति कंठताल्वादिकर्म वागिंद्रियस्य आदानं ग्रहणं हस्तस्य विहरणं गमनं
पादयोः उत्सर्गो मलत्यागानुकूलं कर्म पायोः आनंदः आनंदयतीति व्युत्पत्त्या रतिरूपस्योपस्थस्येति बोध्यं २८ बुद्ध्यहंकारमनसां वृत्तिमाह स्वालक्ष
ण्यमिति स्वस्वासाधारणलक्षणं येषां तानि स्वलक्षणानि महदहंकारमनांसि तेषां भावः स्वालक्षण्यं वृत्तिर्व्यापारः तत्र महतोऽध्यवसायः अहंकारस्याभि
सं मानः मनसः सविकल्पकं व्यापार[illegible] साधारण[illegible]वृत्तिमाह सैषेति तिसृणां वृत्तिः असामान्या असा

सां.चं. १० अंतःकरणेबुद्धे : प्राधान्यं वक्तुमाह एते प्रदीपकल्पा इति एते गुणविशेषाः गुणानां भेदाः सत्वाद्याये बुतेदशेंद्रियमनोहंकाराः पुरुषस्य कृत्स्नमर्थं प्रकाश्य बुद्धौ प्रयच्छंतीति तत्र प्रकाशयंति यथादीपो ... प्रकाश्य पुरुषे प्रापयति ३६ बुद्धिरपि न स्वार्था किंतु परार्थैवेत्याह सर्वमिति सर्वंशब्दादियोगपंत्रत्रियउपभोगः पुरुषस्यतं यस्मात्साधयतितस्मात्सा प्रधानामपि परार्थैव न स्वार्थेति भावः सो दृढहेतुज्ञानजनकत्वादपि सातथेत्यभिप्रेत्याह सैव पुनर्विवेकदशायां प्रधानपुरुषयोरंतरं वैलक्षण्यं सूक्ष्मं अतिदुर्ज्ञेयं विशिनष्टि विषयीकरोति अध्यवसायरूपत्वा बुद्धिरेव ततथेति भावः ३७ अविशेषविशेषावुक्तौ तौ का वित्यत आह तन्मात्रेति तन्मात्राणि सूक्ष्माणि शब्दादीनि अविशेषाः अयोग्यत्वात्ते भ्यः तन्मात्रेभ्यः पंचभ्यो भूतानि स्थूलानि पृथिव्यादीनि एतेपृथिव्यादयः विशेषाः योग्यत्वात्कुतः शांतेति चसकारो हेतौ द्वितीयः समुच्चये यस्मा दाकाशादिषु स्थूलेषु केचित् शांताः सत्वप्रधानतया सुखकराः प्रसन्ना लघवश्च केचिद्रजः प्रधानतया घोराः दुःखकराः केचित्तमः प्राधा

एते प्रदीपकल्पाः परस्परविलक्षणाः गुणविशेषाः कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छंति ३६ सर्वं प्रत्युपभोगं य
स्मात्पुरुषस्य साधयति बुद्धिः सैव च विशिनष्टि पुनः प्रधानपुरुषांतरं सूक्ष्मं ३७ तन्मात्राण्यविशेषास्तेभ्यो भूतानि पं
च पंचभ्यः एते स्मृता विशेषाः शांता घोराश्च मूढाश्च ३८ सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः सूक्ष्मास्ते
षां नियता मातापितृजा निवर्तंते ३९ पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यंतं संसरति निरुपभोगं भावैरधिवासितं लिंगं ४०

न्यात् मूढा मोहकराश्च गुणानां गुणप्रधानभावतोयथेदं तथोपपादितमधस्तात् ३८ एतावंत एव विशेषा इति न किंत्वन्येपि संतीत्याह सू
क्ष्मेति सूक्ष्मा लिंगशरीराख्याः मातापितृजाः स्थूलदेहाः प्रभूताः पर्वतवृक्षाद्याः विशेषकार्यत्वात् विशेषाः तत्र सूक्ष्मदेहाः सूक्ष्मतन्मात्रा
धारत्वात् मातापितृजास्तु मातापितृभुक्तान्नजशुक्रशोणिताधारत्वात् प्रभूतास्तु तद्विलक्षणकारणत्वात्तेषां मध्ये सूक्ष्मा नियताः आमो
क्षावस्थायिनः मातापितृजा निवर्तंते मरणकाले पतंतीति उपलक्षणमेतत् प्रभूता नां नेपि निवर्तंत इति बोध्यं विशिष्य कथनं तु गौणजीवत्वप्रापकं
बोध्यं ३९ लिंगशरीरधर्मानाह पूर्वोत्पन्नमिति लिंगं लिंगशरीरं पूर्वोत्पन्नं पूर्वस्मिन्नादिसर्गे सर्वस्मात्प्रधानादुत्पन्नमाविर्भूतं असक्तं अव्याहतं शि
लामप्यनुप्रविशति नियतं आत्मभिन्नं महदादिसूक्ष्मपर्यंतं महदहंकारमनोदशेंद्रियतन्मात्रसमुदायरूपं संसरति नवं नवं स्थूलशरीरमुपादत्ते पू
र्वंपूर्वं च जहातीति निरुपभोगं स्थूलदेहं विना भोगायोग्यं भावैः धर्मादिभिः अधिवासितं भावैः धर्माधर्मज्ञानाज्ञानादिभिरधिवासितं कृतसंस्काराधीनं यावज्जन्मसंस्का १०

करणानि कानि तत्राह करणमिति त्रयोदशविधं बुद्ध्यहंकारौ एकादशेंद्रियाणि च एषां व्यापारानाह आहरणेत्यादि तत्राहरणं कर्म कर्मेंद्रि
याणां धारणं महदहंकारमनसां स्ववृत्तिप्राणादिपंचवाय्वादेर्धारणात् प्रकाशो बुद्धींद्रियाणां व्यापारविषयाः कतिविधास्तत्राह कार्यं चे
ति तस्य त्रयोदशविधस्य तत्राहार्यं दिव्यादिव्यभेदेन प्रत्येकं द्वैविध्याद्दशधा कर्मेंद्रियाणां एवं धार्यं शरीरादिकमारंभकभूतानां दिव्यादिव्य
भेदाद्दशधा बुद्ध्यहंकारमनसां प्रकाश्यं शब्दस्पर्शरूपरसगंधाख्यं दिव्यादिव्यभेदाद्दशधा बुद्धींद्रियाणां ३२ त्रयोदशकरणानां भेदमाह अं
तःकरणमिति महदहंकारमनोभेदेन त्रिविधमंतःकरणं बाह्यं करणं दशधा पंचबुद्धींद्रियपंचकर्मेंद्रियभेदात् त्रिविधस्यांतःकरणस्य वि
षयं व्यापारमाख्याति जनयंतीति विषयाख्यं मनोहंकारबुद्धीनां व्यापारे बुद्धींद्रियव्यापारस्योपयोगात् कर्मेंद्रियव्यापारस्यापि बुद्धींद्रिय
द्वारांतःकरणव्यापारेऽपयोगः कर्मेंद्रियव्यापारेण जनितं यदार्थं बुद्धींद्रियप्रवृत्त्यांतःकरणप्रवृत्तेः बाह्येंद्रियं किं तत्राह सांप्रतकालं व

करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरं कार्यं च तस्य दशधाहार्यं धार्यं प्रकाश्यं च ३२ अंतःकरणं त्रिविधं द
शधा बाह्यं त्रयस्य विषयाख्यं सांप्रतकालं बाह्यं त्रिकालमाभ्यंतरं करणं ३३ बुद्धींद्रियाणि तेषां पंच विशेषाविशेष
विषयाणि वाग्भवति शब्दविषया शेषाणि तु पंचविषयाणि ३४ सांतःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्
तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि ३५

र्तमानमेव विषयकं बाह्यं बहिरिंद्रियं कर्मेंद्रियस्य तत्परंपरया बोध्यं त्रिकालं अतीतानागत
ष वर्त्तमानविषयं तत्रानुमानशब्दसहकारेणातीतानागतविषयकं इंद्रियसहकारेण वर्त्तमानविषयकं आभ्यंतरं मनोबुद्ध्यहंकाराख्यं ३३ बाह्येंद्रिया
णां विषयान् विवेचयति बुद्धीति तेषामदशेंद्रियाणां मध्ये बुद्धींद्रियाणि विशेषा योगयोग्या अविशेषा अतींद्रियास्तस्य च विषया येषां तादृशानि
तत्र योगयायोगयोर्ग्रहणं योगींद्रियाणां योग्यमात्रग्रहणमस्मदादींद्रियाणां एवं कर्मेंद्रियेषु वाक् शब्दविषया तज्जनकत्वात् शब्दस्य न तन्मा
त्ररूपस्तस्याहंकारजन्यत्वात् शेषाणि पाणिपादपायूपस्थानि पंचविषयाणि पाण्यपायाहर्याणां घटादीनां पंचशब्दाद्यात्मकत्वादिति ३४॥
श्री बाह्येंद्रियाणामप्राधान्यं वक्तुमाह सांतःकरणेति अंतःकरणमनोहंकारौ ताभ्यां सहिता बुद्धिः यस्मात्सर्वमिंद्रियोपनीतं विषयं पुरुषोपकारकं
अवगाहते अध्यवस्यति तस्मात्त्रिविधमंतःकरणं द्वारि [illegible] बाह्येंद्रियाणि सा च तत्परंपरया विंद्रियद्वारे वां

[margin] तः करणानां विषयावगाहनात् प्राधान्यं चान्योपकारकत्वेन त्वा लोचनद्वारा प्रागुक्त दिशा बोध्यं ३५॥

बुद्धिनिष्ठानांधर्मादीनांप्रयोजनमाह धर्मेणेति धर्मेणकेवलमुत्कलेनपरहिंसावर्जितेनप्रकृत्तकेनचपरहिंसापूर्वकेणाऊर्ध्वं

गमनमाज्ञापत्यैंद्रगांधर्वयाक्षपैशाचादिषुलोकेषुअधस्तात्‌रौरवमहारौरवतिमिस्रादिषुकुंभीपाकतामिस्रांधतामिस्रादिनरकेषुअ

धर्मेणशास्त्रनिषिद्धाचरणेनपरपीडनादिनागमनंभवति ज्ञानेनआत्मसाक्षात्कारेणअपवर्गोमोक्षः विपर्ययात्‌अज्ञानाद्बंधः प्राकृ

तिकवैकृतिकदाक्षिणभेदतस्त्रिविधः तत्रप्राकृतिकः आत्मबुद्ध्याप्रकृत्युपासननिबंधनः यथाप्रसंगिशसहस्रं तुतिष्ठंत्यव्यक्तचिंतकाः

वैकृतिकआत्मबुद्ध्येंद्रियोपासननिबंधनः यथादशमन्वंतराणीहतिष्ठंतींद्रियचिंतकाइत्यादि दाक्षिणः पुरुषमजानतः कामनया

वैदिककर्मानुष्ठाननिबंधनोयथापुरुषज्ञानहीनानांस्वर्गाद्यर्थंहि कुर्वतांनानिनानीहकर्माणितेषांबंधस्तुदाक्षिणइतिदाक्षिणइतिसंज्ञा

तुदक्षिणासंबंधनिबंधनावोध्येतिसंक्षेपः ४४ तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेऽयनायेतिश्रुत्यापुरुषज्ञस्यैवमोक्षकथने

धर्मेणगमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण ज्ञानेनचापवर्गोविपर्ययादिष्यतेबंधः ४४ वैराग्यात्प्रकृतिलयः संसारोभव

तिराजसाद्रागात्‌ ऐश्वर्यादविघातोविपर्ययात्तद्विपर्यासः ४५ एषप्रत्ययसर्गोविपर्ययाशक्तितुष्टिसिद्ध्याख्यः

गुणवैषम्यविमर्दात्तस्यचभेदास्तुपंचाशत्‌ ४६ नान्यस्मान्मोक्षाभावःकथनात्‌ज्ञानरहितस्यविरक्तस्यापिनमोक्षइत्याश

यवानाह वैराग्यादितिदृष्टानुश्राविकविषयेष्वलंबुद्धिविशेषरूपाद्वैराग्यात्केवलात्प्रकृतिलयः प्रकृतिपदेनमहदहंकाराद

योपिगृह्यंतेतेष्वात्मबुद्ध्योपास्यमानेषुलयोभवतीत्यर्थः राजसात्‌रजःकार्यात्‌रागात्कामक्रोधादेः संसारोभवतितत्र यागादिगो

चरात्स्वर्गादिः स्त्र्यादिगोचरादिहलोकभोगएवेतिविवेकः ऐश्वर्यात्‌अणिमादिलक्षणात्‌अविघातोगतिप्रतिबंधाभावः विप

र्ययादनैश्वर्यात्तद्विपर्यासः सर्वत्रगतिविच्छेदः यथाकस्यचिदनीश्वरस्यपरगृहेप्रतिघातः ४५ ननुविपर्ययाद्याःसांख्य

किंते न शास्त्रेषु प्रसिद्धास्तत्वांतराणिकतिविधानिवातत्राह एषेति विपर्ययश्चाशक्तिश्चतुष्टिश्चसिद्धिश्चआख्यानामानियस्यसएवगणः

प्रत्ययोबुद्धिस्तत्सर्गस्तज्जन्यं तथाचबुद्धिं लेपविशिष्टानतत्वांतरंकार्यकारणाभेदात्‌तस्यभेदाःपंचाशद्भवंति ननुकथमेककार

णादेतानिकार्याणितत्राह गुणवैषम्यविमर्दादिति गुणानांवैषम्यंन्यूनाधिकबलत्वमंदमध्याधिकभावेननानाविधतयाविम

र्दोगुणस्यगुणांतरेणाभिभवस्तस्मादित्यर्थः तद्वक्ष्यमाणरीत्या विपर्ययादयोधर्मास्तत्र धर्मेसिद्धेजातेइति

(right margin:) विवेकः अज्ञानाद्यस्तुदेवानो विपर्ययादपीपीतिनतत्वांतरमित्यासनांविस्तरः ६६ ११

ननु तर्हि साहंकारेन्द्रियबुद्धि तत्सवभोगोस्तु कृतं सूक्ष्मशरीरेण प्रामाणिकेनेत्यत आह चित्रं यथेति आश्रयं विना यथा चित्रं न तिष्ठति
न वा स्थित्यैव तिष्ठति तद्विशेषैरिति सूक्ष्मैः शरीरैर्विना लिंगं लिंगनाज्ज्ञापनाद्बुद्ध्यादिकं वक्तितन्मात्रादिसमुदायरूपत्वान्निराश्र
येन तिष्ठति किंतु सूक्ष्मशरीराश्रितमेव तिष्ठति अतस्तेषां धर्मिभिस्तं सूक्ष्मशरीरमावश्यकं ततः सत्यवतः कायात्पाशबद्धं वशं गतं अंगु
ष्ठमात्रं पुरुषं निश्चकर्ष बलाद्यम इत्यादिप्रमाणाच्चेति भावः केचित्तु स्थूलशरीरावश्यकत्वाभिप्रायकमिति वर्णयंति तथाहि लिंगं
समुदायात्मकं लिंगशरीरं विशेषैः स्थूलदेहैर्विना निराश्रयं सन्न तिष्ठति किंतु स्थूलशरीरमाश्रित्यैव तिष्ठति अतो न लिंगशरीरेण
स्थूलशरीरस्यान्यथासिद्धिरिति भावः शेषं प्राग्वत् ४१ एवं सूक्ष्मशरीरास्तित्वमुपपाद्य यथा संसरति येन च हेतुना तदुभयमप्याह
पुरुषार्थेति निमित्तं धर्मादि नैमित्तिकं धर्मादिकारणकं स्थूलदेहादि तदुभयप्रसंगेन तदुभयसंबंधेन लिंगमिदं सूक्ष्मशरीरं नटवद्व्यवतिष्ठते

चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिंगं ४१ पुरुषार्थहेतुकमिदं
निमित्तनैमित्तिकप्रसंगेन प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिंगं ४२ सांसिद्धिकाश्च भावाः प्राकृतिका वैकृ
ताश्च धर्माद्याः दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ४३

यथा नटो बहूनि विविधानि रूपाणि गृहीत्वा व्य
वहरति तद्वदिदमपि देवादिशरीरं परिगृह्य व्यवहरतीति किमर्थं तत्राह पुरुषार्थहेतुकमिति पुरुषार्थो हेतुर्निमित्तं यस्य तत् तथा पुरुषार्थफलकमि
ति यावत् नटतद्योगादृष्टबलान्नटयोगार्थमेव तथा व्यवहरतीत्यर्थः कुतोस्यैवंविधो महिमा तत्राह प्रकृतेर्विभुत्वयोगादिति तथा च पुराणं वै
श्वरूप्यात्प्रधानस्य परिणामोयमीदृश इति प्रकृत्याः सूरापगामाभ्यां महदाद्यादिकं सर्वमुपपद्यत इति भावः ४२ प्राकृतवैकृतिकयोः
असिद्धत्वात्तौ कौ तत्राह सांसिद्धिकाश्चेत्यादि भावा धर्माद्यास्ते सांसिद्धिकाः स्वाभाविकाः त एव प्राकृतिकाः यावद्वस्तुस्यापि नो यथाम
हत्तत्त्वाहंकारादयः वैकृतिकाः कदाचिदुत्पन्नाः तेषां मध्ये धर्माद्याः करणं बुद्धितत्त्वं तदाश्रयिणो दृष्टाः सांख्याचार्यैः कार्याश्रयि
णः कललाद्याः कललबुद्बुदमांसपेशीकंडराङ्गप्रसंगव्यूहगर्भस्थस्य तनोर्लिंगितस्य बालकौमारयौवनवार्द्धकानीति संक्षेपः ४३

तुष्टेर्नवभेदानाह आध्यात्मिकाश्चेति प्रकृत्यादिभिन्नत्वेनात्मसाक्षात्कारो मोक्षोपायः परंतु स तु साक्षात्कारः प्रकृतेः परिणाम
विशेषः प्रकृतित एव भविष्यतीति कृत्वा तत्र न यत्नस्तस्य प्रकृत्याख्या तुष्टिरंभ इत्युच्यते कश्चिदेवं चिंतयति न प्रकृतिमात्रात्संभवति तथा
सति गृहस्थस्यापि संभवेत् किंतु संन्यासाश्रमोपादानात्संभविष्यतीत्यालस्यादिना तुष्यति इति तत्संन्यासोपादानाख्या सलिलमित्युच्यते से
वपादिशब्दाख्या तुष्टिरिति गीयते प्रव्रज्यापि कालविशेषं प्राप्य तत्संभविष्यतीत्यतः कालस्यैव प्राधान्यात् ज्ञानप्राप्तिकाले ज्ञानं भविष्य
त्येवेत्यलं प्रयासेनेति तुष्टिः कालाख्या ओघ इत्युच्यते कालविशेषोपि सभाग्यबलादेव भवति अतो भाग्यमेव हेतुर्नान्यदित्यलं प्रयासे
रिति तुष्टिर्भाग्याख्या तुष्टिर्वृष्टिरित्युच्यते एताश्चतस्र आध्यात्मिकाः विषयोपरमो वैराग्यं तेन तुष्टयः पंच बाह्याः प्रत्यादिभिन्न
त्वेनात्मज्ञानाभावात् तथाहि अर्जनरक्षणक्षयभोगहिंसासु दोषदर्शनान्नव चोपरमा भवंति तद्धेतुका तुष्टयोपि पंच भवंति यथा

आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः बाह्या विषयोपरमाच्च पंच नव तुष्टयोभिहिताः ५०
12 ऊहः शब्दोध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः दानं च सिद्धयोष्टौ सिद्धेः पूर्वोंकुशस्त्रिविधः ५१

अर्जनोपायाभिज्ञाटनादयः क्लेशादा अतोलं प्रयासैरिति तुष्टिः सा पारमुच्यते तथा कथंचिदर्जितस्य चोरादितो रक्षणमधिक
ष्टमिति कृत्वा या तुष्टिः सा सुपाराख्या एवं कथंचिद्रक्षितमपि भोगात्क्षयं गमिष्यत्येवेति कृत्वा या तुष्टिः सा पारापारमुच्यते ए
वं शब्दादिभोगाभ्यासात्प्रवर्तंते कामास्ते च पुनः विषयप्राप्त्यप्राप्त्यौ चक्रामिनं दुन्वंतीति कृत्वा या तुष्टिः सा अनुत्तमांभ इत्युच्यते ए
वं भोगेऽवश्यं प्राणिहिंसा जायत एवेति दोषदर्शनाद्विषयोपरमे या तुष्टिः सा उत्तमांभ इत्युच्यते तदेवमाध्यात्मिकाभिश्चतसृभिर्वा
ह्याभिः पंचभिर्नव तुष्टयोभिमताः अंभः सलिलमोघो वृष्टिः पारं तथा सुपारं अनुत्तमांभः पारापारमनुत्तमांभः श्चेति ५० अष्टसि
द्धीराह ऊह इति ऊहो विचारसामर्थ्यं विशेषदर्शनमिति यावत् शब्दः क्रियाकारकभावापन्नपदसमुदायव्युत्पत्तिः अध्ययनं गुरु
मुखतः शास्त्रार्थज्ञानं दुःखविघाताद्दुःखशमनोपायाः त्रय इति दुःखानां त्रित्वात् शमनोपायानामपि त्रित्वं सुहृत्प्राप्तिः आध्यात्मिकज
न संगः दानं दैपशोधन इति धातोर्बाह्याभ्यंतरशौचं सिध्यत्यनयेति सिद्धिः तत्र दुःखविघातसिद्धिः फलत्वान्मुख्या अन्यास्तु तत्साधन १२

पंचाशदितिसामान्यत उक्तं तत्र कस्य कतिविधा भेदास्तत्राह पंचविपर्ययेति विपर्ययः संसारबीजं क्लेशाः पंच अविद्यास्मितारागद्वेषा भिनिवेशास्तेषामेव पर्यायसंख्यं तमोमोहमहामोहतामिस्रांधतामिस्रसंज्ञाः अभिनिवेशो भयं तनुरोगादिकं तानामशक्तीनां रोगसमसंख्यातया कथमष्टाविंशतिधाऽशक्तिस्तत्राह करणवैकल्यादिति करणानां बुद्धिस्त्वेकादशेंद्रियाणां ये वैकल्यं वधस्तस्मात्साऽशक्तिः साऽष्टाविंशतिधेत्यर्थः शेषं सुगमं ४७ पंचानां विपर्ययाणामवांतरभेदमाह भेदस्तमस इति अष्टसु प्रकृतिमहदहंकारपंचतन्मात्रेष्वात्मबुद्धिरविद्या तस्या एव तम इति संज्ञा तस्या अष्टविधविषयकत्वादष्टविधत्वं अणिमाद्यैश्वर्यं प्राप्य सिद्धोहमस्मीत्यात्मन्यहंत्वावेनाभिमानविशेषोऽस्मिता अणिमाद्यष्टैश्वर्यविषयकत्वात्तस्या अष्टविधत्वं सैव च मोहसंज्ञिका मोहस्य चेति चकारादष्टविधत्व

पंचविपर्ययभेदा भवंत्यशक्तिस्तु करणवैकल्यात् अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः ४७ भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः तामिस्रोऽष्टादशधा तथा भवत्यंधतामिस्रः ४८ एकादशेंद्रियवधाः सह बुद्धिवधैरशक्तिरुपदिष्टा सप्तदशधा च बुद्धेर्विपर्ययात्तुष्टिसिद्धीनां ४९ न्वेति शब्दादिषु पंचविषये

न्वेति शब्दादिषु पंचविषयेषु दिव्यादिव्यतया दशविधेषूपादेयत्वबुद्धिर्यो रागः स एव महामोहः विषयस्य दशविधत्वादस्य दशविधत्वं परेणाभुज्यमानेषु दशसु शब्दादिविषयेषु परेणाप्राप्तेष्वणिमादिष्वष्टसु द्वेषस्तामिस्राख्यः अष्टादशविषयत्वादस्याष्टादशविधत्वं अभिनिवेशस्त्रासः अंधतामिस्राख्यः शब्दाद्यो दशाणिमाद्यैश्वर्यं अष्टविधं केयं चिन्न विद्यतिवेति भयं अष्टादशविषयत्वादष्टादशविधं तदेवं विपर्ययभेदा द्वाषष्टिरिति ४८ अशक्तेरष्टाविंशतिभेदानाह एकादशेति एकादशेंद्रियाणां श्रोत्रत्वग्दृग्रसनघ्राणवाक्पाणिपादपायूपस्थमनसां वधाः वैगुण्यानि यथासंख्यं बाधिर्यं कुष्टत्वांधत्वं जडताऽजिघ्रता तथा मूकता कौण्यपंगुत्वक्लैब्योदावर्तमत्तताः एतद्धेतुकाश्च व्यापारे बुद्धेरशक्तिरिति सह बुद्धिवधैरित्युक्तं अधुना कति बुद्धेः स्वरूपतो वधास्तत्राह सप्तदशधेति तुष्टिर्नवधा [illegible] विपर्यया [illegible] इति ४९ ॥ ॥

न

१२ तदेवं संगदर्शयित्वा तस्यापवर्गसाधनवैराग्योपयोगिनी दुःखतामाह तत्र जरामरणेति यत्तः पुरुषः स्वयं चेतनोपि तत्र लोकत्रयाख्ये सर्गे जरामरणकृतं दुःखं प्राप्नोतीति तस्मात् दुःखस्वभावेन स्वत एव सर्गो दुःखरूपः विवेकिनामिति शेषः यथाह भगवान् पतंजलिः परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिन इति अत्र परिणामपदेन जरादिदुःखं बोध्यं तापपदेन मानमप्यवहितम् यासमितिमरणात्रासदुःखं बोध्यं संस्कारपदेन पुनर्जननादिदुःखं बोध्यं कियंतं कालं दुःखं प्राप्नोतीति तदाह लिंगस्याविनिवृत्तेः यावल्लिंगं महदादि न निवर्तते तावत् ज्ञानेन लिंगस्य विनिवृत्तौ तु मोक्षमधिगच्छतीति भावः ५५ सा स्वप्रकृतिमात्रारब्धत्वं वक्तुमुपसंहरति इत्येषेति इतीत्युपसंहारे एष महदादिविशेषपर्यंतः प्रकृतिकृतः प्रकृत्यैवोत्कारीत्यर्कतः नेश्वरेण नवाऽदृष्टेनेत्यर्थः विशेषभूतं पृथिवी अपमभिसंधिः धर्मसापेक्षत्वविकल्पेनाह अत्र त्वा नानाभावाच्चनेश्वरः कारणं नाप्यदृष्टं कार्यं

13 तत्र जरामरणकृतं दुःखमाप्नोति चेतनः पुरुषः लिंगस्याविनिवृत्तेः तस्माद्दुःखं स्वभावेन ५५ इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरंभः ५६

स्य कारणत्वायोगात् प्रलयकालीनानारंभकपरमाण्वादिक्रियादौ व्यभिचारेण कार्यमात्रेऽदृष्टादीनां कारणत्वाच्चेति दिक् अचेतनत्वेन स्वप्रयोजनाभावात् एष आरंभः परार्थ एव ननु कस्यार्थे आरंभस्तत्राह प्रतिपुरुषेति प्रत्येकपुरुषेत्यर्थः अत्र भोजयितुमिति विहाय विमोक्षार्थमित्युक्तिस्तु एकस्य मोक्षेपि सर्गस्य नाशो नास्ति सर्वसाधारणत्वादिति ज्ञापनाय अत एव प्रतिपुरुषेत्युक्तं आह चैवं स मानतंत्रे भगवान् पतंजलिः तदर्थ एव दृश्यस्यात्मा कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वादिति परार्थारंभेन कोपि विवादः स्यात् स्वार्थ इवेति यथान्यो जनः स्वार्थे प्रवर्तते तथैवास्य परार्थ आरंभ इत्यत एव प्रयोजनवत्त्वमात्रस्य प्रवृत्तिमूलत्वात् गुणानां सत्त्वरजस्तमसां प्रावृत्त्या सुखदुःखमोहात्मकाः परस्परमभिभाव्याभिभावकत्वेनाविरुद्धाः जायन्ते तासां च सर्वत्रैव दुःखानुबंधान्न दुःखत्वं] १२

यास्तो विस्तरः ५६१

त्वाद्योऽष्टपदृत्तिविवेकः तत्रोहादेः संज्ञाविशेषश्चाकरे यथा तारा सुतारा तारतारा प्रमोदः प्रमुदितः मोदमानः रम्यकः सदामुदितारव्या: सिद्धय
इति ञ्रासामुपादेयत्वं विपर्ययाशक्तितुष्टीनां तु हेयत्वं संज्ञापयितुमाह सिद्धेः पूर्वोंकुश स्त्रिविध इति पूर्वः पूर्वोक्तः विपर्ययाश
क्तितुष्टिरूपस्त्रिविधः सिद्धेरंकुशः कारणविघटनादिद्वारा निवारकः अतः सिद्धिपरिपंथित्वादंकुश इवेति विपर्ययाशक्तितुष्टयो हे
या एवेति भावः ५१ ननु भोगो विषयमंतरेण न भवतीत्याकाशादिसर्ग एवास्तु कृतं महदाद्यंतीद्रियसर्गेण तत्राह न विनाभावैरिति भावैः प्र
त्ययैर्विषयैर्विना लिंगं महदाद्यंतीद्रियवृंदं न भोगसाधनमित्यर्थः लिंगेन महदादिना विना भावानां विषयाणां न निर्वृत्तिः न भो
गसाधनत्वं अयमभिप्रायः नहि विषयः स्वरूपतो भोगहेतुः सर्वेषां सर्वविषयभोगाद्यन्तैरपि तु ज्ञात एव तज्ज्ञानं चेंद्रियांतःकरणे
विना न स्युरुभयस्वीकारः तस्मात्तद्वयोरप्यावश्यकत्वात् लिंगाख्यः लिंग एव तत्र तस्मादाक्षिप्यत इति लिंगं महदाद्यंतीद्रियवर्गः ञ्रा
न विनाभावैर्लिंगं न विना लिंगेन भावनिर्वृत्तिः लिंगाख्यो भावाख्यस्तस्मात्द्विविधः प्रवर्तते सर्ग ५२ अष्टविक
ल्पो दैवस्तैर्यग्योनश्च पंचधा भवति मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ५३ ऊर्द्ध्वं सत्वविशालस्तमोवि
शालश्च मूलतः सर्गः मध्ये रजोविशालो ब्रह्मादिस्तंबपर्यंतः ५४ वाख्यः भ्यत्ते आप्यतेऽर्थादिं द्वियेणेति विषयवर्गः प्र
त्यय इति सिद्धः ५२ भौतिकसर्गविभागमाह अष्टविकल्प इति ब्राह्मप्राजापत्यैंद्रपैत्रगांधर्वयक्षराक्षसपैशाचभेदादष्टविधो दैव इत्य
र्थः तैर्यग्योन इति पशुपक्षिसर्पकीटस्थावरभेदात् पंचविध इत्यर्थः मानुष्यश्चैकविधः समासतः ब्राह्मणत्वाद्यवांतरजातिभेदाविव
क्षयेति भौतिकः दैहिकः तेन घटादिनिरासः केचित्तु घटादेः स्थावरेंतर्भावं वदंति ५३ भौतिकस्य विशेषमाह ऊर्द्ध्वमिति भूर्लोकादू
र्द्ध्वं सत्वविशालः सत्वबहुलः तत्र त्वेषु रजस्तमसोः सत्वेपि सत्वाधिक्यश्रवणात् मूलतः अधः पतनशीलस्तैर्यग्योनस्तमोविशालः
तमोबहुलस्तेषु सत्वरजसोः सत्वेपि तमस आधिक्योपलब्धेः मध्ये भूर्लोके रजोविशालः रजोबहुलः सत्वतमसोः सत्वेपि धर्मा
धर्मप्रवृत्तिपातदर्शनेन रजस आधिक्यकल्पनात् ब्रह्मादीतिसोयं ब्रह्मादिस्तंबपर्यंतः सर्गो लोकभेदेनैव संस्थित इत्यर्थः स्तं
बः स्थावरः ५४

ननु परार्थमप्युपकारसंबंधेन प्रवृत्तिर्दृश्यते नहि पुराणात्किञ्चिदप्युपकारः प्रकृतेरत आह नानाविधैरिति गुणवती प्रकृतिः
सत एवोपकारिणी पुंसः पुरुषस्य तु अगुणस्य सत्त्वभावकतया गुणातीतस्यात एवानुपकारिण उपकारासमर्थस्य नाना
विधैरिह दृष्टं कार्येन्द्रियमनःप्रभृतिभिरुपायैरर्थप्रयोजनं अपार्थकं स्वीयप्रयोजनशून्यमेव चाति आचरति स्वभावस्व
पं गुणवता यदनुपकारिण्यप्युपकारकरणं अतः परार्थमप्युपकारसंबंधेनैव प्रवृत्तिरिति न नियमो व्यभिचारादित्यास्तां
विस्तरः ६० स्यादेतत् नर्तकी नर्त्यसभ्यो दर्शयित्वा पुनराह्वाने नृत्यत्यपि पुनः कृतकृत्यत्वेऽपि प्रवर्तते यथा तथा प्रकृतिरपि
पुरुषायात्मानं दर्शयित्वा विवेके निवृत्तापि पुनः प्रवर्त्स्यतीत्यत आह प्रकृतेरिति सुकुमारतरं सलज्जं दृष्टास्मीति कृत्वा पुनः पु
रुषस्य दर्शनं नोपैति दृष्टिविषया न भवति यथा कदाचित् कुलस्त्री व्रतवती साध्वी दारा व्यवस्थितपुरुषेणारहसि आगतेन दृष्टा सा व्रीडा

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः । गुणवत्यगुणस्य सतस्तस्यार्थमपार्थं चरति ६० प्रकृतेः
14 सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य ६१ तस्मान्न बध्य
तेनापि मुच्यते नापि संसरति कश्चित् संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ६२ ॥ ॥ ॥

यमानात्वरितमंतः प्रविशति दृष्टाहमनेनेत्येवमबुध्य न दर्शनमुपैत्यन्यपुरुषस्य एवं प्रकृतिः परात्मना पुरुषेण
यदाज्ञानचक्षुषा दृष्टा सा व्रीडायमाना कुलस्त्रीवत् पुनर्दर्शनं नोपैति पुरुषस्य विवेकख्यातेरेव ततः प्रवृत्तिप्रतिबं
धकत्वादिति भावः ६१ स्यादेतत् पुरुषश्चेदगुणोऽपरिणामी कथमस्य सुखदुःखादिरूपो बंधः अतो न मोक्षोऽपि मोक्षस्य बं
धेन समानाधिकरणत्वात् ततस्मात् पुरुषविमोक्षार्थमिति रिक्तं वचः श्रीमामर्षकामुपसंहारव्याजेनाभ्युपगच्छन्नपाकरोति त
स्मादिति वस्तुतोऽसंगत्वादेव पुरुषो बंधमोक्षादिरहितोऽस्ति नानिरोधोन चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा
परमार्थतेति श्रुतेरिति भावः कस्तर्हि बंधादिमानित्यत आह संसरतीति प्रकृतिरेव नानापुरुषाश्रया बुद्ध्यादिद्वारा तादृशी तस्या च
बंधादिकं बुद्धिनिष्ठमेव पुरुषे तत्संपर्कात् प्रतिमारोप्यत एवकेवलं न तु तदस्त्यस्तीति भावः ६२ ॥ ॥ ॥ १९

नन्वचेतनायाः प्रकृतेः कथं प्रवृत्तिस्तत्राह वत्सेति अन्वयव्यतिरेकाभ्यां वत्सविवृद्ध्यादिप्रयोजनेनैवाचेतनस्य क्षीरादेः प्रवृत्ति दर्शनात् प्रवृत्तिर्न चेतननियता किं तु कुत्र दृष्टमात्रसाध्या अतस्तद्वदेवाचेतनाया अपि प्रकृतिः पुरुषविमोक्षार्थं प्रवृत्तौ न किंचिद्बाधकमिति भावः न च क्षीरप्रवृत्तेरपीश्वराधिष्ठाननिबंधनतया प्रवृत्तेश्चेतननियतत्वमव्याहतमेव तथा चक्रं पक्षमिद मिति वाच्यं ईश्वरे मानाभावात् प्रामाणिकत्वेप्याप्तकामस्य प्रयोजनं विना प्रवर्तकत्वायोगात् न च कारुण्यात्तदिति वाच्यं सर्गा त्प्राक् जीवानां दुःखित्वासंभवेन दुःखनिवृत्तीच्छारूपकारुण्यस्यापि तस्मिन्नसंभवात् तस्मात् स्वयमचेतनापि प्रयोजनेनैव क्षी रादिवत् प्रवर्त्तत इति सिद्धं ५७ ननु प्रयोजनमुद्दिश्यैव प्रवृत्तिर्दृष्टा न चास्यास्तदस्ति तत्राह औत्सुक्येति औत्सुक्यमिच्छाय पंमयासंभोक्तव्येतिज्ञानिवृत्त्यर्थं रत्यादिक्रियासु प्रवर्त्तते लौकिकः अनिवृत्तायामिच्छायां दुःखदत्वात् साचविषयसिद्ध्या

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य पुरुषमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ५७ औत्सुक्यस्य निवृत्त्यर्थं यथा क्रियासु प्रवर्त्तते लो . कः पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तं ५८ रंगस्य दर्शयित्वा निव र्त्तते नर्त्तकी यथा नृत्यात् पुरुषस्य तथात्मानं प्रकाश्य विनिवर्त्तते प्रकृतिः ५९

वे निवर्त्तत इति सैव फलं एवमव्य क्तं प्रधानमपि पुरुषार्थो मया कर्त्तव्य इतीच्छायां पुरुष विमोक्षरूपफलार्थं प्रवर्त्तते तत्सिद्धं विना तादृशेच्छाया अनि वृत्तेरनिवृत्ताया अस्या निवृत्त्यात् तथा च स्वार्थमुखेनैव परार्थारंभ इति न कोपि दोषः इत्यास्तां विस्तरः ५८ ननु भवतु प्रव त्तिः प्रकृतेर्निवृत्तिस्तु कथं तथा च पुरुषस्यानिर्मोक्ष एव स्यादत आह रंगस्येति रंगपदस्यानिपर्तत्या च प्रधानर्त्तकी सुभ्री ताहावभावलीलाविलासवती विविधालंकारशोभिता नृत्यगीतादिभिरात्मानं रंगस्य सभ्यादेर्दर्शयित्वा दृष्टाहमनेने तिकृतप्रयोजनात् घनप्राप्त्या निवर्त्तते एवं प्रकृतिर्बुद्ध्यादि सुखदुःखात्मभावेनात्मानं पुरुषस्य प्रकाश्य त्वमन्यो ह मन्येति विवेकेनो निवर्त्तते असंयुक्ता भवति तथा निवृत्तिकः पुरुषो मोक्षमधिगच्छति ५९ ॥ ॥ ॥

ननुनित्ययोः प्रकृतिपुरुषयोः संयोगसत्त्वात्कथं तस्याः प्रसवनिवृत्तिस्तत्राह दृष्टामयेति तयोः संयोगेपि सर्गस्य जनने प्रयो
जनं प्रयुज्यते तेनेति व्युत्पत्त्या सहकारणं नास्तीति तयोर्मध्ये प्रकृतिः उपरमति न प्रसूत इत्यन्वयः तत्कथं नास्ति तदाह
दृष्टामयेति तयोर्मध्ये एकः पुरुषः स्वभिन्नोपेक्षकः संपन्न इति त्येवं गुणा प्रकृतिर्मया दृष्टेत्युपेक्षको भवत्यपरमतेत्तत्र भोगाद्या
वेशरहिता भवतीति यावत् एको दृष्टास्मि तथा च प्रसवे पुरुषस्य प्रकृतिभेदाग्रहः सहकारि दर्शनेसतितु स नास्तीति भावः ६६ ननु भिद्यते
हृदयग्रंथिः छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्यादिश्रुत्या तत्त्वज्ञानानंतरमेव मोक्षे सर्वकर्मक्षयेण
देहाद्यभावस्य च नात्कथं प्रकृतिदर्शनं ज्ञाने देहस्य हेतुत्वात्तत्राह सम्यगिति सम्यक्ज्ञानं मिथ्याज्ञानोच्छेदनं ज्ञानं तदधिगमात्
तदुत्पत्तेः धर्मादीनां देहारंभकानां धर्मादीनां संचितक्रियमाणानां दग्धबीजभावानां अकारणत्वाप्ते येस्वफलोत्पादनासमर्थ्य

15 दृष्टामयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या सति संयोगेपि तयोः प्रयोजनं नास्ति सर्गस्य ६६ सम्य
क्ज्ञानाधिगमाद्धर्मादीनामकारणप्राप्तौ तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः ६७ प्राप्ते शरीरभेदे च
रितार्थत्वात्प्रधानविनिवृत्तौ ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ६८॥ ॥ ॥

मा
तस्योक्तप्रमाणाद्विविच्य ज्ञातविवेके न प्राप्तौ संस्कारो देहारंभकादृष्टं तद्वशाद्धृतशरीरस्तिष्ठति यथा कुलालव्यापारविगमेपि वेगवशा
च्चक्रं भ्रमति तिष्ठति प्रारब्धस्य भोगैकनाश्यत्वात् अत एवास्य तावदेव चिरं यावन्न विमोक्ष्येथ संपत्स्य इत्युक्तं श्रुतौ भोगेनत्वि
तरे क्षपयित्वेति वेदांतेषु भगवता व्यासेन च तथा च तत्त्वज्ञाने सति कर्मक्षयः इत्यस्य प्रथमात्त्वज्ञानप्रागभावस्य नष्टत्वात् फलानुत्पा
दमात्रमर्थो न देहाद्यभावोपीति संक्षेपः ६७ ननु यद्युत्पन्नतत्त्वज्ञानोपि तिष्ठति कदा तर्हि मोक्षं गच्छतीत्यत्राह प्राप्त इति भोगेन प्रा
रब्धक्षये पतनः शरीरस्य भेदो विनाशस्तस्मिन्प्राप्ते सति चरितार्थत्वात् बुद्धितत्त्वादिद्वारा कृतभोगापवर्गलक्षणप्रयोजकत्वात्
प्रधानस्य पुरुषं प्रति विनिवृत्तौ संयोगाभावलक्षणालये उभयं अभ्युपगम्य कैवल्यं दुःखविनाशं प्राप्नोति द्वयं किं तदाह एकांत्य
वश्यं भावि आत्यंतिकं पुनर्दुःखसजातीयानुत्पत्तिविशिष्टं यतद्विशेषणद्वयात्मकं कैवल्यमुभयं ... आत्मसाक्षात्कारवान् पुरुषः क्षीणाशेषकल्मषः भोगेन प्रारब्धक्षये सत्यवश्यमात्यंतिकदुःखविनाशं प्राप्नोतीति समुदायार्थः ६८॥
न

ननु पुरुषस्यापि प्रकृतिसंपर्कादारोपितसुखदुःखादिकं बंधः इत्युक्तं सा पुनः केन साधनेन बध्नाति मोचयति वा तदाह रूपैरिति
पुरुषार्थं भोगं प्रति आत्मना बुद्धिरूपेण आत्मानं पुरुषं रूपैः सप्तभिः धर्मवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्यैः बध्नाति पुरुषा
र्थं स्वरूपावस्थानलक्षणां मोक्षं प्रति एकेन रूपेण ज्ञानेन मोचयति संसारान्निवर्तयति एतेन वैराग्योपरत्याद्यभावेऽपि ज्ञानं मोक्ष
स्य कारणं भवत्येवेति ज्ञापितं उक्तं च तथा वेदांतेषु पूर्णबोधे तदन्यो हि प्रतिबद्धोपदानतदा मोक्षो विनिश्चितः किं तु दृष्टदुःखं न नश्यती
ति द्वे वैराग्योपरमो दृष्टदुःखं यथा चित्तव्यवहारक्लेशः तथा च विषयजिहासारूपवैराग्यस्य विषयदोषदर्शनजन्यस्य पुनर्भोगे सदी
नतामात्रं फलं न तु मोक्षोऽपि एवं धीनिरोधरूपो परमस्यापि यमादिसाध्यस्य चेतोदर्शनमेव फलं न मोक्षः श्रुतिषु ज्ञानैकलभ्यत्व
कथनादित्यास्तां विस्तरः ६३ भवतु ज्ञानादेव कैवल्यं तद्वेतु कस्मात् किमाकारं च तत् तदाह एवमिति उक्तप्रकारपुरुषगोचराभ्यासात्

रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ६३ एवं तत्त्वाभ्यासा
न्नास्मि न मे नाहमित्यपरिशेषं अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानं ६४ तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनि
वृत्तां प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः ६५ नः पुनश्चिंतनरूपान्निदिध्यासनात् केवलं पुरुषमात्रगोचरं ज्ञानं

साक्षात्कार उत्पद्यते इत्यर्थः एतेन निदिध्यासनसहकृतेन मनसैवात्मगोचरनिर्विकल्पकसाक्षात्कारो भवति न श्रुतानुमानाभ्यां तयोस्तत्रा
सामर्थ्यादिति बोधितं यथाह समानतंत्रे भगवान्पतंजलिः ऋतंभरा तत्र प्रज्ञा श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वादिति
आकारमाह नास्मीत्यादिना नास्मीत्यस्य न कर्तास्मीत्यर्थः तेन बुद्धिभिन्नोऽहमिति प्रापं न मे दुःखमिति शेषः तेन दुःखाद्यारोपाभावो ल
ब्धः नाहमित्यनेनाहंकारभेदज्ञः नास्ति परिशेषो यस्मादित्यपरिशेषं चरमं तस्य सत्त्वधायांतम् अस्मि प्रज्ञेत्यादिना योगसूत्रेण उक्तं अवि
पर्ययात् व्यधिकरणप्रकाराभावाद्विशुद्धं प्रमात्मकं मिथ्याज्ञानवासनोन्मूलनक्षमं एवंविध एवात्मसाक्षात्कारस्तत्त्वज्ञानपदनोच्य
ते ते इतिभावः ६४ तत्त्वज्ञानानंतरं पुरुषः किं करोति तदाह तेनेति निवृत्तिः पूर्वोक्तेन ज्ञानेन निवृत्तप्रसवां प्रसवो भोगभेदसाक्षात्कारादयः
तेषां जनितत्वान्निवृत्तां प्र[illegible] गीतनृत्यादिप्रवर्तनानां नर्तकी
स्वस्थो निर्विकल्पो निराकुलः पश्यति एवं पुरुषोऽपि तासु द्यान्यवस्थासु वर्तमानां प्रकृतिं पश्यति दृष्टां प्रकृतिः स्वगुणैः पुरुषान्

तास

[illegible]

पे त्वावच्छिन्नसार्थमैः पुरुषार्थमिति पुरुषस्यार्थः प्रयोजनं मोक्षाख्यं यस्मात्तादृशं ज्ञानं गुह्यं बहूनां दुःखबोधं परमर्षिणा कपिलेन कथि
तं यत्रेति निमित्ते सप्तमी यज्ज्ञाननिमित्तमित्यर्थः ६९ एतद्भगवता यत्तत्त्वज्ञानमुक्तं तस्य कुतः आगमस्तत्राह एतदिति पवित्रं पावनं स
र्वपापनाशकत्वात् अग्र्यं सर्वेभ्यः पवित्रेभ्यो मुख्यं मुनिः कपिलः आसुरये ऽनुकंपया प्रददौ कथितवान् स पुनः पंचशिखाय व्याख्या
तवान् तेन वहुधा शिष्योपदेशद्वारा प्रकाशितमित्यर्थः ७० ईश्वरकृष्णेन किं ततः साक्षात् प्राप्तं तत्राह शिष्यपरंपरयेति आर्या
ख्यं छंदोविशेषस्तद्विशिष्टं पद्यमार्येत्युच्यते अतउक्तमार्याभिरिति किं कृत्वा सम्यक् अध्ययनभावनाभ्यां सिद्धांतं विज्ञाय ७१ एतच्च

26

पुरुषार्थं ज्ञानमिदं गुह्यं परमर्षिणा समाख्यातं स्थित्युत्पत्तिप्रलयाश्चिंत्यंते यत्र भूतानां ६९ एतत्पवित्रमग्र्यं मुनिरा
सुरयेनुकंपया प्रददौ आसुरिरपि पंचशिखाय तेन वहुधा कृतं तंत्रं ७० शिष्यपरंपरयागतमीश्वरकृष्णेन चैतदा
र्याभिः संक्षिप्तमार्यमतिना सम्यक् विज्ञाय सिद्धांतं ७१ सप्तत्यां किल येर्थास्तेर्थाः कृत्स्नस्य षष्टितंत्रस्य आख्या
यिकाविरहिताः परवादविवर्जिताश्चापि ७२ इति श्रीसांख्यचंद्रिका कारिकाग्रंथः संपूर्णः समाप्तः श्रीरामः

सांख्या

शास्त्रार्थसूचनाच्छास्त्रं ननु प्रकरणमित्याह सप्तत्यामिति षष्टितंत्रस्य पुरुषप्रकृत्यादिषष्टिपदार्थव्युत्पादकतंत्रस्य ये
र्थास्तेर्थाः किल सप्तत्यां कारिकासप्तत्यां कथिताः किंभूताः आख्यायिकाविरहिताः कथाघटितदृष्टांतादिरहिताः तथा पर
वादविवर्जिताश्च सद्दर्शनोत्थापनरहिताश्चेत्यर्थः तत्र यथा कपिलोक्तषडध्याय्यां चतुर्थेऽध्याये आख्यायिकाः पंच
मे परवादस्तत्रात्र न क्रियंते इति भावः षष्टिपदार्थगणनागमांतरे यथा पुरुषः प्रकृतिर्बुद्धिरहंकारो गुणास्त्रयः तन्मात्र
मिंद्रियं भूतं मौलिकार्थाः स्मृता दश विपर्ययः पंचविधस्तथोक्ता नवतुष्टयः करणानामसामर्थ्यमष्टाविंशतिधा
मतं इति षष्टिः पदार्थानामष्टाभिः सह सिद्धिभिरिति तथा चात्रैतत् षष्टिपदार्थविवेचनान्नेदं प्रकरणं किं तु तंत्रमेवेति सि
द्धं ७२ इति श्रीरामगोविंदतीर्थशिष्यनारायणतीर्थकृता सांख्यचंद्रिका समाप्ता ॥ श्रीरामरामरामरामरामरामरामः

Acc. 236 (23½)

२½ पन्ना

17

शारदाकृष्ण चंद्रिका

27